M-2737

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
मंत्रचंद्रिका		मंत्र	पूर्ण		3/12	116	संस्कृत	कागद	09	38		

॥ इद पुस्तकं मंत्रचंद्रिकाद्वयं ॥

॥ श्री ॥ ~~[illegible]~~ ॥

...गणपतये नमः ॥ ॥ श्रीदक्षिणामूर्तिगुरुभ्यो नमः ॥ ॥ विश्वेश्वरं नमस्कृत्य मातरं पितरं गु...
...थ तनुते सिद्धिदां मंत्रचंद्रिकां ॥ तत्रादौ गुरुलक्षणं ॥ श्रोत्रियो ब्रह्मनिष्ठः स्वतत्त्वप्रतिपादन...
...॥ समस्तमंत्रप्रयोगकुशलः उपशांतशील आश्रमी परमकारुणिकः सर्वलक्षणसंपन्नो
...नुषः पुरुषः सर्वमंत्रोपदेष्टा भवति ॥ इति गुरुलक्षणं ॥ अथ शिष्यलक्षणं ॥ शिष्यस्तु श्रद्धान्वितोध्य...
संपन्नः सदाचारो नित्यानित्यविवेकी सर्वलक्षणयुक्तो गुरुभक्तः निखिलपुरुषार्थकांक्षी मंत्रदेवतोपास...
...उपदेशार्हो भवति ॥ इति शिष्यलक्षणं ॥ विना दीक्षां न मोक्षः स्यान्नराणां शिवशासनमि...
...शैवार्चनचंद्रिकायां शिवसद्भावे ॥ दीक्षायां न गुरुत्वेन पति नु वैखानसान्विये ॥ रुद्रयामलागमे ॥
...गृहस्थाश्रमिणं तथेति ॥ आगमकौमुद्यां गुरुर्गृहस्थ एवैको न कदाचिद्यतिर्गुरुरिति ॥ श्रीरुद्र...
...शिष्यो गुरुत्वे ता न पिता दीक्षयेत्सुतान् ॥ न तथैव तरे ॥ न पुत्रांश्च तथा भ्राता भ्रातरं...

सार्य[illegible] हणं भगवन्सर्वज्ञ मम यद्धितं। अथ गुरुः स्वयं साक्षाद्ब्रह्मैवेति विभाव्य च। शिरस्यंजल
मः। उ[illegible] धपुष्पाक्षतादिभिः। ज्ञातकृत्यो ऽभिमंत्र्यापस्तच्छिरस्यभिषेचयेत्॥ मूलमंत्रेण
चारे। ओं [illegible] दद्याच्छिरसि हस्तं न्यस्याकृत्यो ऽभिमंत्रितं॥ भावयित्वा ऽमृतमयं हृत्पादस्था विलोकयन्॥ श्री
[illegible]: प्राङ्मुखस्थितः शिष्यो ऽर्घमुखाय च। दक्षकर्णे दिशेन्मंत्रं शिष्यः प्रणम्य भक्तितः। ततो
[illegible] संतोष्य वस्त्राद्याभ्समर्पणैः॥ अथ गुर्वाज्ञयामंत्रं ब्रह्मणा गुरुणात्मना॥ विभावयन्निजे
[illegible] पदेष्टारं ज्ञातं॥ जपं समाप्य प्रणमेत्पुनर्गुरुं समर्पयेदिति। केवलमुमुक्षुपरं गुरुपाद
[illegible]॥ नो अग्ने अररिवां अपाशुरः। ऋकु मंत्रमुक्त्वा ओं भो भगवन्मूढोस्मि मां तारयत
[illegible] क्ष मम हितं प्रब्रूहीत्युक्त्वा पुनः प्रणम्य गुरुसंनिधौ तिष्ठेत्। ततो गुरुः ओं ह्रीं द्वारे
[illegible] मः इति मंत्रेण द्वारं संपूज्यालं प्रविश्य। ओं सहस्रारहुं फट् इति सुदर्शनास्त्रेण विघ्नं

यदि पतिस्तदा पत्नीं सदीक्षयेदिति ॥ अथ दीक्षाविधिः ॥ तत्र शुभेह्नि आचम्य प्राणानायम्य
णपतिक्षेत्रपालेभ्यो नमः ॥ इति नत्वा ॥ ॐ अद्येत्यादि देशकालौ संकीर्त्य ब्राह्मणश्चेद
अमुकशर्मा ॥ क्षत्रियश्चेदमुकगोत्रामुकवर्मा ॥ वैश्यः अमुकगुप्तः शूद्रश्चेदमुकदासे
र्थपुरुषार्थसिद्धिकामः अमुकमंत्रग्रहणं करिष्ये इति संकल्प्य ॥ अथ श्रीपादुकास्मरणं
वरणपत्रं १ लोकस्य द्वारं २ अथायिस्मृतिः ॥ शातधारसुसम॰ ऋकू २ अथ केवलमुमुक्षुश्चे
वे ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वैशा
॥ इति गुरुं भगवद्बुद्ध्योपसृत्य अधीहि भगवो ब्रह्मेति ब्रूयात् ॥ शिष्यः अहमज्ञो नैव जाने
हिते ॥ श्रीगुरो तव पादाब्जपद्मलक्ष्यं नमोनुदं ॥ त्राहि मां घोरसंसाराद्ब्रह्मविष्णुशिवात्म २

सार्यं सं तत्र यंदत्वा। आसनविधिं कृत्वा तत्रोपविश्य श्रीगुरुं प्रणम्य गणेशपूजनं कुर्यात्॥ ॐ गणपतये न
मः इति मंत्रेण॥ ततो मूलेन प्राणानायम्य मूलमंत्रस्य ऋष्यादिन्यासान् कृत्वा यथोक्तविधिना ध्यात्वा मानसोप
चारैः संपूज्य स्वस्याग्ने विशेषार्घं संस्थाप्य अस्त्रेण संरक्ष्य तस्मात् किंचिज्जलं प्रोक्षणीपात्रे निक्षिप्य तेन जलेन
आत्मानं पूज्योपकरणं चाभ्युक्ष्य आत्मानं देवतारूपं विभाव्य बहिः पूजामारभेत्॥ तत्र सिंदूरेण यथो
क्तविधिना पूजाचक्रं तदभावे अष्टदलं कृत्वा॥ श्रीविद्यांदीक्षां या तु ललितावितासे इत्थं श्रीचक्रं तु हृद्यसि
...तिसुंदरं॥ वेदिकायामासने स्वे प्राङ्मुखः पूजितो विशोदिति॥ पिंगलामते सद्योधिवासा प्युक्तः। सर्वोपि
...थवा प्रकुर्वीत यथाविधीति। तन्मध्ये आधारं संस्थाप्य ॐ मं वह्निमंडलाय धर्मप्रद दशकलात्मने नमः
...संपूज्य यं धूम्रार्चिषे नमः १ रं ऊष्मायै २ लं ज्वलिन्यै ३ वं ज्वालिन्यै ४ शं विस्फुलिंगिन्यै ५ षं सुश्रियै ६ सं सुरू
... कपिलायै ८ क्षं हव्यवाहायै ९ क्षं कव्यवाहायै १० इति दशकलाः समावाह्य ततः स्वर्णादिरचितं कुंभं प्रक्षालित
चंदनागरु कर्पूरैः धूपयित्वा त्रिगुणेन तंतुना संवेष्ट्य ॐ कुंभाय नमः इति गंधपुष्पाभ्यां संपूज्य विष्टरास्त
...रत्नानि च निक्षिप्य प्रणवमुच्चरन् कुंभपीठयोरैक्यं विभाव्य पीठमध्ये स्थापयेत्॥ ततः कुंभे ॐ अं

ं लाथ प्रदद्वादशाकलात्मनेनमः ।इति संपूज्य ॥ कँ भँ तपिन्यैनमः १ खँ बँ तापिन्यै २ गँ फँ धूम्रायै ३ घँ पँ मरीच्यै ४
ज्वालिन्यै ५ चँ पँ रुच्यै ६ छँ दँ सुषुम्णायै ७ जँ थँ भोगदायै ८ झँ तँ विश्वायै ९ ञँ णँ बोधिन्यै १० टँ ढँ धारिण्यै ११ ठँ
डँ क्षमायै १२ इति द्वादश कलाः आवाह्य तत्तत्तिर्थोदकेन सुवासितजलेन वा विलोममातृकामुच्चरन् पूजयेत्
सोममंडलाय कामप्रदषोडशकलात्मनेनमः इति संपूज्य ॥ अँ अमृतायै १ आँ मानदायै २ इँ पूषायै ३
ईँ तुष्ट्यै ४ उँ पुष्ट्यै ५ ऊँ रत्यै ६ ऋँ धृत्यै ७ ॠँ शशिन्यै ८ लृँ चंद्रिकायै ९ ॡँ कान्त्यै १० एँ ज्योत्स्नायै ११ ऐँ श्रियै १२ ओँ
प्रीत्यै १३ औँ अंगदायै १४ अँ पूर्णायै १५ अः पूर्णामृतायैनमः १६ इति षोडश कलाः समावाह्य ॥ गंगाद्याः सरि
तः सर्वाः समुद्राश्च सरांसि च ॥ अयांतु यजमानस्य दुरितक्षयकारकाः ॥ इत्यनेन तीर्थान्यावाह्य । ततो
ऽश्वत्थ० नवचूत० वट० बकुल० पनस० पकपल्लवैः कल्पवृक्षबुध्या कुंभवक्त्रं पिधाय तस्मिन्प्रस्थतोयग्राहि
पात्रे सफलाक्षतं कल्पवृक्षफलबुध्या संस्थाप्य कुंभं निर्मलेन क्षौमयुग्मेन संवेष्ट्य मूले नवकुंभमूर्तिं संकल्प्य
यथोक्तरूपेण देवतां ध्यात्वा तस्यामावाह्य षोडशोपचारैः संपूज्य । ततस्तत्तत्कल्पोक्तावरणैः पूजयेत्

ततो गुरुर्दक्षिणे स्थण्डिलं विधाय तत्र नित्यहोमरीत्या अग्निं विधिवत्संस्कृत्य तत्र देवतामावाह्य यथोक्तरूपां ध्यात्वा गंधा
द्यैरुपचारैः संपूज्य ॥ आज्यमानीय वह्नेः समंतात्कृत्य मूलेन त्रिवारं अभिमंत्र्य ॥ ततो वह्निदेवतात्मनामैक्यं विभाव्य मूले
नाष्टोत्तरशतमाज्याहुतिर्हुत्वा ॥ ततो स्वेष्टदेवतायाः आवरणदेवतानां एकैकामाहुतिं हुत्वा पुनः मूलेन दशा
हुतीर्जुहुयात् ॥ अत्र देवताप्रार्थनामाहुराचार्याः ॥ कारुण्यनिलये देवि सर्वसंपत्तिसंश्रये ॥ कारुण्यव
स...मातः कृपायास्मिन् कृपां कुरु ॥ आवेणे प्रमुखैः पाशैः पाशितस्य सुरेश्वरी ॥ दीनस्यास्य दयाधारे कु
...त्यमोक्षं विधेहि ॥ २ एहि कामुष्मिकैर्भोगैरापि संवर्ध्यतामसौ ॥ स्वभाक्तैः सफलाचारैर्दीयतां निष्फला
त २ ततो गुरुः शिष्यं श्रद्धातिरेकं पंचगव्यं पाययित्वा स्थंडिलसमीपं नीत्वा दिव्यदृष्ट्या विलोक्य
...वेभाव्य भूतशुद्धिं कृत्वा महाव्याहृतिभिर्हुत्वा वह्निं संपूज्य विसर्जयेत् ॥ प्रपंचसारे दीक्षापटले
...दिशि कुंडमुत्तरस्यां प्राग्वेद्यां चतुरस्रमेकमेव ॥ स्वगृह्योक्तविधानेन अग्निं प्रज्वाल्य देशिकः कुं
...डे वापि ब्राह्मणे रथवा स्वयं ॥ औपासने यदि स्वार्थमितरेषां तु लौकिकः ॥ ...ये ...सत्रक वाज्य

४ [illegible]सर्वमुल्लेखनादिकं ॥ स्वगृह्योक्तविधानेन तं तो होमं समाचरेत् ॥ ततो गुरुः नेत्रमंत्रेण शिष्यस्य नेत्रे तु तन
[illegible]ण बध्वा तं तत्स्तान गृहीत्वा कुंभसमीपे नीत्वा मंत्रेण तात तस्यांजलिं पुष्पैरापूर्य स्वयं मूलमंत्रमुच्चरन् घंटस्थ
[illegible]पुष्पांजलिं दापयित्वा तस्य नेत्रबंधनं विमुच्य कुंभान् स्तरे तमुपवेश्य ॥ ॐ अज्ञानतिमिरांधस्य ज्ञाना०
[illegible]तं गुरुः शिष्येण पाठयित्वा कुंभदेवतां संपूज्य तस्य देहं मूलमंत्रस्य ऋष्यादिन्यासान् कृत्वा । कलशजलं ब्र
[illegible]तं चिंतयन् शिष्यं समलंकृतं देवस्य समीपे भद्रपीठे अथवा स्वस्तिकपीठे पूर्वाभिमुखं समुपवेश्य पंचवाद्य
प[illegible]पुरःसरं गुरुः कुंभं सध्वजं कुंभमुखस्थाम्रपल्लवादिकं कृत्वा रक्षणार्थं खबुध्वा शिष्यशिरसि निधाय प्राङ्मुख
हि लोममातृकामुच्चरन् वेदघोषं कुर्वद्भिः ब्राह्मणैः सह मूलमंत्रेण तं पूर्वाभिमुखोपविष्टं उत्तराभिमुखः स्थित्वाभि
षिच्य सामान्यजलेन शिष्यमाचामयित्वा देवतास्वरूपं तं षडंगन्यासेन संकलीकृत्य शुद्धे धौते नूतने वाससी परिधा
य स्वाचांतं तं समीपमुपवेश्य शिष्यदेहे संक्रांतां देवतां तस्यैव देहं गंधादिभिः संपूज्य शिष्यदेवतयोरैक्यं विभावयन् सु
विनीतस्य शिष्यस्य दक्षिणकर्णे मूलमंत्रं वारत्रयं वदेत् ॥ गुरोर्लब्धं मंत्रं अष्टधा जपेत् ॥ गुरुदेवतात्मनामैक्यं धिया

मंत्र॰ चं
पत्र ४

संभावयन्नुं दंडवद्भूमौ गुरुं देवतात्मकं प्रणमेत्॥ तस्य पादांबुजयुगं स्वमूर्ध्नि योजयेत् उपदेशानंतरमाह विश्वसारे॥ महादीक्षा तथा
दीक्षा उपदेशानंतरः परं॥ कलौ युगे च कर्त्तव्यो उपदेशः कलौ युगे॥ चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये॥ मंत्रमात्रप्रकथनमुपदेशः स उ
च्यते॥ अथ श्रीविद्यार्णवे गुरोरभावे मंत्रग्रहणप्रकारः॥ पद्मपुराणे॥ गुरोरभावे विप्रेंद्र मंत्रग्रहणमुच्यते॥ कृष्णपक्षे त्रयोदश्यां
दक्षिणामूर्तिसंनिधौ॥ तालपत्रे मनुं लिख्य स्थापयेच्च तदग्रतः॥ पायसं विनिवेद्याथ प्रणमेद्दंडवत्ततः॥ तालपत्रं समादाय प
[illegible]ठेन्मंत्रं ततः॥ एवं गृहीतो मंत्रः स्याद्गुरोरपि विशिष्यते॥ गुरोः संभाविता दोषाः प्रायेणतु कलौ युगे॥ एवं गृहीमंत्रः स्यात्सर्वसिद्धिप्र
[illegible]णां॥ ग्रंथांतरे॥ कृतकृत्यः तथा शिष्यः सर्वं तस्मै निवेदयेत्॥ यच्च यावच्च तद्द्रव्यं गुरोराकृष्य ततः॥ गोभूहिरण्यं विपुलं
[illegible]सेत्रादिकं वसु॥ नचेदर्द्धं तदर्द्धं वा तदत्रांतु समर्थं पि वा॥ शरीरमर्थप्राणांश्च सर्वं तस्मै निवेदयेत्॥ ततः प्रभृति कुर्वीत गुरोः प्रि
[illegible]यः॥ ब्राह्मणान्तर्पयेत्पश्चाद्द्रव्यभोज्यैश्च दक्षिणं इति॥ ततः गुरुः मूलमंत्रं अष्टोत्तरशतवारं जपित्वा देवतायै निवे
[illegible]मुद्रयास्या मनुदासयेइति क्रियादीक्षा॥ तंत्रसारसमुच्चये॥ धर्मदः प्रातः कालस्यात्संगवो राजदः स्मृतः॥ मध्याह्ने स
[illegible]दः स्यात्सायाह्ने मध्यमो भवेत् भजनिमंत्रदाने तु निषिद्धा देशिकोत्तमैरिति॥ पांतु देवगणाः सर्वे पूजामादाय पार्थि
वं॥

५

...मप्रसिध्यर्थं पुनरागमनाय च ॥ एवं गृहीतो मंत्रः स्यात्सर्वसिद्धिप्रदो नृणां ॥ एषा क्रियावती दीक्षा प्रोक्ता सर्वसमृद्धिदा ॥ इति ॥
...गुरोः कृत्यं तंत्रांतरोक्तं लिख्यते ॥ स्नानं संध्यासदाचारं नित्यं काम्यं तथैव च ॥ मंत्रसिद्धिप्रकारांश्च शिष्यायाभिवदेद्गु
...ते ॥ तत्र सदाचारस्तूक्तः प्रयोगसारे ॥ देवस्थाने गुरुस्थाने स्मशाने वा चतुःपथे ॥ पादुकासनविण्मूत्रमैथुनानि परि
...त् ॥ देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवता ॥ सिद्धं सिद्धाधिवासांश्च श्रीपूर्वं समुदीरयेत् ॥ प्रमत्तां मत्तसजाकन्यां पु
...रतां पतितस्त्रीं ॥ विरूपां मुक्तकेशां च कामार्तां च न निंदयेत् ॥ कन्यायोनिं पशुक्रीडां दिग्वस्त्रां प्रकटस्तनीं ॥ नालोक
...परद्रव्यं परदारांश्च वर्जयेत् ॥ छायां न्यगोगुरुदेवाग्निविद्याकोशं नरान्प्रति ॥ नैव प्रसारयेत्पादौ नैतानापि च लंघयेत् ॥ लिं
गिनं व्रतीनं विप्रं वेदवेदांगसंहिताः ॥ पुराणागमशास्त्राणि कृत्यांश्चापि न दूषयेत् ॥ गुरुद्रव्यं न भोक्तव्यं तेनादत्तं कदाचन ॥
दत्तं प्रसादवद्ग्राह्यं लोभितो न कदाचन ॥ अद्वैतं देवपूजां च गुरोरग्ने परित्यजेत् ॥ तंत्रांतरे ॥ अथ वान्यप्रकारेण दीक्षात
त्त्वमुत्तमं ॥ प्रवक्ष्यामि समासेन सर्वतंत्रेषु गोपितं ॥ सर्वे वाराः ग्रहाः सर्वे नक्षत्राणि च राशयः ॥ यस्मिन्नहनि संतुष्टो
गुरुः सर्वे शुभावहाः ॥ संतुष्टे च गुरौ तस्य संतुष्टाः सर्वदेवताः ॥ गुरुं संतोषयेद्धन्या द्रव्येन च तथा भवेत् इति द्वयं तु मु ५

क्तिमुक्तिलक्षणं ॥ मुमुक्षूणां सदाकालः स्त्रीणां कालस्तु सर्वदा इति ॥ तथा तत्र सारेपि ॥ यदैवेच्छा नदा दीक्षा गुरोराज्ञानुरूपतः
न तीर्थं न व्रतं होमो न स्नानं न जपक्रिया इति ॥ तथा ॥ कृष्णपक्षे मुमुक्षूणां अन्येषां असिते तरे ॥ शुक्लपक्षे शुभादी
क्षा कृष्णपापं च मीदिनातृ ॥ तथा भूतिकामैः सिते पक्षे मुक्तिकामैः सितेतरे ॥ रत्नत्रांतरे ॥ वाकूदिक्षा • चाक्षदृकूदि
क्षा • स्पर्शदीक्षेति सा त्रिधा इति ॥ तत्र वाक्दीक्षाप्रयोगः ॥ गुरुः परचिद्रूपे शिवे चित्तं निधाय ॥ तदुद्भुतान् समस्तमं
त्रान्ध्यायन् ॥ तन्मयः स्वयं शिष्याय • मंत्रान्तरं पदिशेत् ॥ तत्र पूर्वं गुरुः शिष्येण षडंगादीन् कारयित्वा पश्चात् मंत्रं शिष्यायोदीर
येत् तदुक्तं चरहस्ये पानिषादे ॥ अंगहीना निवाक्या निर्गुरुर्नोपादिशेद्बुधः ॥ न्यासं कारयित्वा देवताधिकरणेपि तत्त्कं श्रेयो
यो आदिनार्च्येयस्छंदो देवता भावलेण नमंत्रेण याजयति व्यापयाति इति वा ॥ इति वाक्दिक्षा ॥ २ अथ दृक्दीक्षा ॥ त
त्र गुरुः स्वनेत्रे निमील्य परमात्मस्वरूपिणीं • मंत्रदेवतां ध्यात्वा • प्रसन्नचित्तो • दिव्यचक्षुषा • शिष्यं निरीक्ष्य • मंत्रोपदे
शं कुर्यात् ॥ इति दृक्दीक्षा ॥ ४ अथ स्पर्शदीक्षा ॥ तत्र गुरुः स्वतस्ततले शिवरूपं स्वगुरुं ध्यायन् • मूलविद्यां • षडंगमं
त्रमातृकाः जपन् शिष्यस्य शिरसि • स्वदक्षिणकरं • निधाय उपदिशेत् ॥ इति स्पर्शदिक्षा ॥ ५ अथ व ॥ श्रीश्रुद्रा

६

स्वाकू दीक्षा नान्या दीक्षा विधीयते इति ॥ न वेदिकं जपेत् शूद्रः स्त्रियश्चैव कदाचन ॥ नमोन्तं शिवमंत्रं वा वैष्णवं वेष्यते
रिति याज्ञवल्क्यसंहितायां ॥ शूद्रप्रकरणे स्मृतिः ॥ नमस्कारेण मंत्रेण पंचयज्ञान्समाचरेदिति ॥ पिंगलमते ॥ चतु
लक्षणादीनां दीक्षां कुर्वीत मंत्रवित् इति ॥ देवीयामले ॥ स्वाहाप्रणवसंयुक्तं मंत्रं शूद्रे ददद्द्विजः ॥ शूद्रो निरयगा
स्याद्विप्रः शूद्रत्वमाप्नुयात् ॥ इति विज्ञोबणोक्ते • षडंगन्यासे स्वाहापदस्थाने शूद्राणां नमः पदोच्चारः ॥ सोत्रामणीतं
मायाबिजं ब्राह्मणस्यात् श्रीबिजं क्षत्रियस्मृतं ॥ कामबिजं भवेद्वैश्यो वाग्बिजं शूद्रस्मृतं ॥ चतुर्बिजं परित्यक्तो मंत्रः पौरुष्यसंज्ञकः
चतुर्बिजं ब्राह्मणानां गोक्षत्रियाणां त्रिबिजकं ॥ बीजद्वयं तु वैश्यानां शूद्राणां त्वेकबिजकं ॥ तत्त्वसारे ॥ कृच्छ्रं चान्द्रायणादीनि
चरितस्य मनुं दिशेत् ॥ उपोषणत्रयं वापि दोषयद्दानकं व्रतत्रयं ॥ माहातीर्थे द्रुतसरे श्रीगुरोः संनिधौनु वा ॥ चंद्रसूर्यग्र
हे वाथ सिद्धक्षेत्रे शिवालये ॥ मंत्रमात्रस्य कथनात् उपदेशः स उच्यते ॥ इत्युपदेशविधिः ॥ शचीं च शिवपत्न्यांश्च
कुंभे संपूज्य सादरं ॥ शिवकुंभाभिषेकात्मा दीक्षा स्यादभिषेचिका इति ॥ तंत्रसारे ॥ अदीक्षिता ये कुर्वंति जपपूजा
दिकाः क्रियाः ॥ निष्फले न त्रियेतेषां शिलायामुप्तबीजवत् ॥ भविष्ये विभवे सति ये माहात्मा कुर्याद्विधिविस्तरं ॥

६

न तत्फलमवाप्नोति देवद्रोही स उच्यते इति देव्यागमे शिववाक्यं ॥ गुरोरग्रे पृथक्पूजामद्वैतं तु परित्यजेत् ॥ दीक्षां व्याख्यां प्रभुत्वादि गु
रोरग्रे विवर्जयेत् ॥ शिवः ॥ शिष्येणापि प्रकर्तव्या शुश्रूषा च गुरोः सदा ॥ शुश्रूषया विना विद्या न भवेत्सा फलप्रदा ॥ गुरौ तुष्टे
शिवस्तुष्टः शिवे तुष्टे जगत्त्रयं ॥ गुरो रुष्टे महेशानि नाहं त्राता त्वया सह ॥ तस्मात्सर्वप्रयत्नेन गुरोः कोपं न कारयेदिति
॥ इति मंत्रचंद्रिकायां दीक्षाविधाख्यः प्रथमोल्लासः ॥ १ ॥ श्रीदक्षिणामूर्तिगुरुभ्यो नमः ॥ अथाह्निकप्रकारः ॥ तत्र
श्रीमान्साधकेंद्रो ब्राह्मे मुहूर्ते चोत्थाय स्वशिरसि सहस्रारे कमले निजगुरुं ध्यायेत् ॥ प्रातः शिरसि शुक्ले द्विनेत्रं द्विभुजं गुरुं
॥ वराभयकरं शांतं संस्मरेन्नामपूर्वकं इति ध्यात्वा ॥ ॐ ॥ ऐं ॥ ह्रीं ॥ श्रीं ॥ हौं ॥ सः ॥ सोहं अमुकानंदनाथगुरुभ्यो नमः ॥ ॐ ॥ ७ ॥ अ.
प[...]गुरुभ्यो नमः ॥ ॐ ७ अ ॥ परापरगुरुभ्यो नमः ॥ इति नत्वा ॥ महाविद्योपासकश्चेत् ॥ ॐ ॥ ऐं ह्रीं ॥ श्रीं हसखफ्रें हसक्ष
म[...]रयूं सहखफ्रें सलहक्षमलवरयीं अमुकानंदनाथगुरुश्रीपादुकां पूजयामि नमः ॥ इति नत्वा ॥ ॐ लं पृथिव्यात्मने गंधं क
ल[...]यामि इति कनिष्ठांगुष्ठाभ्यां नमः ॥ हं आकाशात्मने पुष्पं क॰ तर्जन्यंगुष्ठाभ्यां ॥ यं वाय्वात्मने धूपं क॰ ॥ अंगुष्ठतर्जनीभ्यां ॥ रं व
ह[...]ने दीपं क॰ मध्यमांगुष्ठाभ्यां ॥ वं अमृतात्मने नैवेद्यं क॰ अनामिकांगुष्ठाभ्यां ॥ सं सर्वात्मने तांबूलं कल्पयामि सर्वांगुली
[...] नमो सुगुरवे तस्मै इष्टदेवस्वरूपिणे ॥ यस्य वागमृतं हंति विषं संसारसंज्ञितं ॥ इति प्रण
[...]त्वा स्वहृदि देवतां संचिंत्य गुरुदेवतैक्यस्वरूपं सच्चिदानंदानंताद्वय लक्षणं पूर्णं ब्रह्माहमस्मीति समाधिं कृत्वा

८

[illegible]नुग्रहार्थं दिव्यमूर्तिं गृहित्वा स्वहृदये तिष्ठति ध्यात्वा नमस्कृत्य ॥ अथ हंसगायत्रीजपसंकल्पः ॥
[illegible]ः श्वासैर्भक्त्या हरिस्मरणात्संकल्पं कुर्यात् ॥ यो ऽनुस्यूत हंसमंत्रं जायते प्राणवृत्तितः ॥ एकविं
[illegible]ति साहस्रं षट्शतं चाधिकं जपः ॥ अजपाख्यो ऽधुना तस्य समर्पणं करोम्यहं ॥ मूलाधारे म
णि[illegible]पूरे स्वाधिष्ठाने स्वनाहते ॥ विशुद्धचक्रे तथाज्ञाख्ये सहस्रारे च तत्क्रमात् ॥ षट्शतं तु गणे
[illegible]य षट्सहस्रं स्वयंभुवे ॥ विष्णवे षट्सहस्रं च षट्सहस्रं पिनाकिने ॥ जीवात्मने सहस्रं तु
गुरवे च सहस्रकं ॥ परमात्मने सहस्रं तदोधिष्ठात्रे र्पयाम्यहं ॥ एवं नित्यं समभ्येव योगी संकल्प
यलतः ॥ १ एकविंशतिसाहस्रं षट्शतं चाभिजपाधं ॥ हंसाख्ये प्राणवृत्तिभिः हंसः सोहं जपा
म्यहं ॥ हंसमंत्रं जपाम्यहं इति पाठांतरं ॥ इति संकल्प्य तन्मंत्रं यथाशास्त्रं जपेत्सुधीः ॥ ए
कांते अनन्यमनसा प्राणवृत्यैक्यमात्मनो ॥ जीवपरात्मनोरित्यर्थः ॥ विभावयन्सदाभ्यसे

८

तुभ्यासोध्यासत्वयतनः ॥ मनोनाद्यः समाधिस्थ ज्योतिर्दत्तार्नमात्मनः ॥ ततोऽपरोक्षताज्ञानं तेनमुक्तोभवेन्नरः
ततोहंसः इतिमंत्रं पंचविंशतिवारं जपेत् ॥ इत्यभ्यासकृत्यः ॥ ततः प्रातः प्रभृति सायांतं सायादिप्रात
रं तथा ॥ यत्कृतामिजगंनाथस्तदस्तु तव पूजनमिति निजकृत्यं समर्प्य ॥ ततः समुद्रमेखले देवीप
र्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं प्रार्थ्य श्वासानुसारेण पादो
विनिक्षिप्य गृहाद्बहिर्गच्छेतु ॥ ततः शौचादिकं विधाय विहितादिने दंतकाष्ठं गृहीत्वा क्लीं कामदे
व[illegible]सर्वजनप्रिया नमः ॥ इतिमंत्रेणादंतधावनं कुर्यात् ॥ श्रीं मायै नमः इतिमंत्रेण मुखं प्रक्षाल्य
[illegible]म्यनघादंगवाऽस्त्रेण नीरं प्रक्षाल्य तत्र स्नानीयं स्थापये बगलायां विशेषः आदौ मुखं तु गृहि
[illegible]त्रेणानेन मंत्रेण त्रयं तु ॥ छिद्रं दृष्ट्वा तत्काष्ठं ततो दंतान्विशोधयेत् ॥ ऐं ह्रीं श्रीं क्लीं यक्षसेनाधिप
त[illegible]णभद्राय कित्तरस्वाहा २४ इति मंत्रः ॥ जासाम्रजंबुचांपेय अपामार्गोथ ऽगुग्गुलः ॥ ततः
[illegible]या तां काष्ठं क्रमात्सूक्ष्मं सिद्धे ॥ ततः षोडशभिर्वारैर्मुखप्रक्षालनमाचरेत्तु मंत्रेणानेन मंत्र

दे[illegible]तथा स्वहृद्भिर्वेदिता ॥ ॐ ह्रीं सर्वदुष्टमुखस्तंभिनि सर्वसत्ववशंकरी स्वाहा २१ इति मंत्रेण ॥ अष्टवारं ततः
[illegible]मूलेन स्वीय मस्तकं ॥ ततो आचम्य तीर्थं देवता रूपं विविन्य मत्वा पके षे स्ना नं विधाय पूर्वाभिमुखो
भू[illegible]ा आद्येत्यादि॰ श्री अमुकदेवता प्रीत्यर्थं तां त्रिकस्नानमहं करिष्ये इति संकल्प्य ॥ मूलेन अङ्गुष्ठादिक
र[illegible]गां निविधाय जले त्रिकोणं विभाव्य ॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जले
[illegible]स्मिन् संनिधिं कुरु ॥ क्रौं इत्यंकुशमुद्रया सूर्यमंडलात् तीर्थान्याकृष्य जले संयोज्य वं इत्यमृतीकृ
त्य फट् इत्यस्त्र मंत्रेण संरक्ष्य तज्जले देवतामूर्तिं ध्यात्वा लज्चरणं संस्पृश्य तीर्थोदकेन मूलमंत्रं उ
च्चारयन् कुंभमुद्रया स्वसिरस्यभिषिंच्य तीर्थजले निमज्य मूलमंत्रं ॥ त्रिवारं जपन् अघमर्षणं कृत्वा
चम्य मूलांते अमुकदेवतां तर्पयामि नमः ॥ इति सप्तवारं संतर्प्य तीर्थादिकं सूर्यमंडले विसृज्य गो
पिचंदनेनोर्ध्वपुंड्रधारणं भस्मना त्रिपुंड्रधारणं वा स्वविधानेन कुर्यात् ॥ तदभावे केनस्वमूलमंत्रेण
वा भस्मधारणं कुर्यात् तद्यथा ॥ ॐ ऐं आत्मतत्वं शोधयामि स्वाहा ॐ ऐं विद्यातत्वं शोधय ॐ ऐं

शिवतत्वं शोधयामि स्वाहा इत्याचम्य वागादिस्पृष्ट्वा शक्तिसंध्यायां शैवसंध्यायां तु ह्रां आत्मतत्वं शोधयामि
स्वाहा ह्रीं विद्यातत्वं शोधयामि हूं शिवतत्वं शोधयामि इत्याचमनं श्रीविद्योपासकश्चेत् ऐं आत्मतत्वं शोधयामि स्वाहा क्लीं
विद्यातत्व सौः शिवतत्व ऐं क्लीं सौः सर्वतत्वं शोधयामि स्वाहा ॥ वैष्णवस्तु ॐ केशवाय स्वाहा ॐ नारायणा
य स्वाहा ॐ माधवाय स्वाहा इत्याचम्य ॥ गोविंदाय नमः ॥ विष्णवे नमः इति द्वाभ्यां करौ प्रक्षाल्य ॥ मधु
सूदनाय त्रिविक्रमाय इति द्वाभ्यामंगुष्ठमूले नोष्ठौ संमृज्य वामनाय श्रीधराय इति द्वाभ्यां तथैव मुख
मुन्मार्ज्य ॥ हृषीकेशाय वामकरं प्रोक्ष्य पद्मनाभाय पादौ संप्रोक्ष्य दामोदराय मूर्धानं संप्रोक्ष्य संकर्षणा
य [illegible]हृत मध्यमांगुलित्रयेण आस्यत्रयं संस्पृश्य वासुदेवाय प्रद्युम्नाय इति द्वाभ्यां अंगु अच्युताय
[illegible]र्जन्यांगुष्ठाभ्यां नाभिं संस्पृश्य ॥ जनार्दनाय इति पाणितलेन हृदयं संस्पृश्य ष्ठ तजनीभ्यां ना
[illegible] संस्पृश्य अनिरुद्धाय पुरुषोत्तमाय इति द्वाभ्यां अंगुष्ठानामिकाभ्यां चक्षुषी संस्पृश्य ॥
[illegible]धोक्षजाय नारसिंहाय इति द्वाभ्यां तथैव श्रोत्रे संस्पृश्य उपेंद्राय इति शिरः संस्पृश्य ॐ

हो [illegible]ध्माय नमः इति हस्तं प्रक्षाल्य श्रोत्रं स्पृशेत् इत्याचमनविधिः॥ अन्यत्र मूलेनैवाचमनं कृत्वा स्वपुरतः जले ॐ गंगे च यमु
[illegible]दिना तीर्थान्यावाह्य ॐ इति कुशेन त्रिवारं भूमौ जलं निक्षिप्य सप्तधा तज्जलेन मूलांते मूर्धानं अभिषि
[illegible] नः षडंगन्यासं कृत्वा वामहस्ते जलं निधाय दक्षिणहस्तेनाच्छाद्य हं यं रं वं लं इति आभिमंत्र्य मूलमंत्रम्
[illegible]गालितोदकबिंदुभिस्तत्त्वमुद्रया मूर्ध्नि सप्तधाभ्युक्षणं कृत्वा शेषजलं दक्षिणहस्ते समादाय तेजोरूपं
[illegible]इडयाकृष्य देहांतः पापं प्रक्षाल्य कृष्णवर्णं तदुदकं पापरूपं ध्यात्वा पिंगलया विरेच्य पुरःकल्पित
वज्र शिलायां फडिति मंत्रेण ताडयेत् इति अघमर्षणं कृत्वा हस्तौ प्रक्षाल्याचम्य ह्रीं हंसः श्रीसूर्याय एषो
र्घ नमः इति मंत्रेण सूर्यार्घ अर्घत्रयं दद्यात्॥ ततो मूलांते सूर्यमंडलस्थायै अमुकदेवतायै एषोर्घ्यं नमः
इति त्रिवारमर्घ्यं दत्त्वा॥ शिवादौ तु मूलमंत्रांते सूर्यमंडलस्थदेवाय इदमर्घ्यं नमः इति॥ ततो मूलगाय
त्रिं मूलमंत्रं वा अष्टविंशति वारं जपेत् जपांते स्वपुरतः जले देवं ध्यात्वा मूलांते अमुकदेवतां तर्पयामि नमः

नमः इति सप्तवारं त्रिवारं वा संतर्प्य ॐ गुरुं तर्पयामि नमः परमगुरुं त० परात्परगुरुं त० इति च तर्पयेत् श्रीविद्यां
यां तु मूलांते श्रीमाहा त्रिपुरसुंदरीं तर्पयामि इति १६ संतर्प्य ॥ ऐं देवान् तर्पयामि क्लीं ऋषींस्तर्पयामि सौः पितॄं
स्तर्पयामि इति ततो सूर्यमंडलदेवतां ध्यात्वा मूलमंत्रं यथाशक्ति जपित्वा संहारमुद्रया स्वहृदये देवतां समा
नीय तीर्थे नमस्कृत्य यागस्थानमाविशेत् ॥ इति त्रिकालेतांत्रिकसंध्याविधिः ॥ ततो स्त्रमंत्रेण द्वारं प्रोक्ष्य ॐ
धात्रे नमः दक्षशाखायां ॥ विधात्रे नमः वामशाखायां तथैव पार्श्वयोः गंगायै० यमुनायै० द्वारश्रियै० ऊर्ध्वशाखा
यां [illegible] देहल्यै नमः अधः शाखायां वास्तुपुरुषाय० मंडपमध्ये संपूज्य अस्त्राकृश्वेन ॐ आमुकाचनमंडपाय नमः
[illegible] द्वारदेवताभ्यो नमः इति संपूज्य ॥ ॐ अंतरितगूरक्षांतरिताः अरांतयः इति वै दिक्मंत्रांते ॐ प्राखंडका
[illegible] भूता भुमौ ये चांतरिक्षगाः दिविलोकस्थिता ये च तेनशंतु शिवाज्ञया इति मंत्रांते मूलांस्त्रमुच्चरन् वाम
[illegible] पार्ष्णिघातः त्रयेण भौमान् ऊर्ध्वोर्ध्वतालत्रयेणांतरिक्षगान् दिव्यदृष्ट्यावलोकनेन दिव्यान् विधानु
[illegible]य देहल्यां मूलास्त्रं विन्यस्य स्वदक्षांगेन द्वारशाखामाश्रित्य स्वं स्पृशन् दक्षपादपुरःसरं देहलिं अस्पृशन्

ग्नेनिमं उपांत : प्रविशेत् ॥ ततो मूलास्त्रेण भूमिं प्रोक्ष्य तत्र कुशासनमास्तीर्य पृथ्वीतिमंत्रस्य मेरुपृष्ठ ऋ
षिः सुतलं छंदः कूर्मो देवता आसनोपवेशने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां
देवि पवित्रं कुरु चासनं इति प्रार्थ्य ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॐ अनंतासनाय नमः इति संपूज्य स्व
शिरसि गुर्वादिक्रमेण पादिरोत् ॥ ततः स्वशिरसि ॐ ॐ स्वस्ति श्री परमात्रिवनाथ पदाधचो पगुरुपारंपर्यक्रमेण
स्वगुरुनाथपादांबुजं यावत्तावत् प्रणोमि ॐ श्रीगुरुभ्यो नमः इति मूर्ध्नि संबंध अथवा ॐ श्रसाध्यरोषगुरुपारं
पर्यक्रमेण स्वगुरुनाथपादांबुजं यावत्तावत् प्रणोमि ॥ ॐ गुं गुरुभ्यो नमः ॐ पं परमगुरुभ्यो ॐ पं परात्परगुरुभ्यो इति
नत्वा स्ववामे ॐ गुरुभ्यो नमः स्वदक्षिणे ॐ गणेशाय नमः मध्ये मूलांते इष्टदेवतायै नमः इति विन्यस्य पुट इति ता
लत्रयं दत्वा रं इति जलधारया आग्निप्राकारं विभावयेत् अथ भूतशुद्धिः ॥ तत्र हंस इति मंत्रेण हृदयात् जीवात्मा
नं मूलाधारस्थ कुंडलिन्या सह सुषुम्ना मार्गेण शिरसि स्थित सहस्रारकमलकर्णिका मध्यवर्तिनि परमात्मनि सं
योज्य प्राणायामक्रमेण स पाप पुरुषं देहं ॥ ब्रह्महत्या शिरस्कं च स्वर्णस्तेय भुजद्वयं ॥ सुरापान हृदा युक्तं गुरु

तस्य कटिदेशे यं ॥ तत्रस्थं वायोतिप्रबलं दहेद् अंगं प्रसंगपातकं ॥ उपपातकं रोमाणं रक्तश्मश्रु विरोचनं ॥ खड्गचर्मधरं भीमं कुन्त
दंष्ट्राकुलोद्भवं ॥ यं बीजेन शोषितं मत्वा रं बीजेन दग्धं मत्वा यं बीजेन भस्म रेचयेत् ततो वं बीजेन अमृतराष्टिं विभा
व्य लं बीजेन तेनामृतेन वर्णमयेन दिव्यं शरीरं उत्सन्नं इति ध्यात्वा सोहं इति मंत्रेण परमात्मसकाशात् जीवात्मा
नं हृदयमानयेदिति भूतशुद्धिः प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुशिवा ऋषयः ऋग्यजुःसामानि छंदां
सि चैतन्यं देवता प्राणप्रतिष्ठापने विनियोगः ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं ळं क्षं सः मम प्राणा इह प्राणाः
जीव इह स्थितः मम सर्वेंद्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ यद्वा
सोहं इति प्राणप्रतिष्ठां कृत्वा ॥ ॐ अस्य श्रीमातृकान्यासमंत्रस्य ब्रह्मणे ऋषये नमः शिरसि ॥ गायत्र्यै छंदसे न
मः मुखे ॥ श्रीमातृकासरस्वत्यै देवतायै नमो हृदि ॥ हल्भ्यो बीजेभ्यो नमः गुह्ये ॥ स्वरेभ्यः शक्तिभ्यो नमः पादयोः ॥ अ
क्षः कीलकाय नमः नाभौ ॥ अमुकमंत्रांगत्वेन मातृकान्यासे विनियोगः ॥ ॐ कं ५ आं अंगुष्ठयोः ॥ इं चं ५ ईं तर्जन्योः
उं टं ५ ऊं मध्यमयोः ॥ एं तं ५ ऐं अनामिकयोः ॥ ॐ पं ५ औं कनिष्ठिकयोः ॥ अं यं ५ अः करतलकरपृष्ठयोः ॥ अं कं ५
आं हृदयाय नमः ॥ इं चं ५ ईं शिरसे स्वाहा ॥ उं टं ५ ऊं शिखायै वषट् ॥ एं तं ५ ऐं कवचाय हुं ॥ ओं पं ५ औं नेत्रत्रयाय

११

त्रौषट्॥ ॐ यँ ऽअः अस्त्राय फट्॥ ध्या०॥ मुक्तां वर्णमयीं देवीं त्रिनेत्रां चाशिकेशखरां॥ चतुर्भुजां प[illegible]पसं
[illegible]रूपीनोन्नतपयोधरां॥१ इति ध्यात्वा॥ कंठे ॐ अं नमः॥ इत्यादि षोडशस्वरान् न्यसेत्॥ हृदये कादि
ठांतान्॥ नाभौ डादि फांतान्॥ लिंगे बादि लांतान्॥ मूलाधारे वादि सांतान्॥ भ्रूमध्ये ॐ हं नमः ॐ क्षं नमः
इत्यंतरमातृका॥ अथ बहिर्मातृका॥ ललाटे ॐ अं नमः मुखे आं० दक्षनेत्रे इं० वामनेत्रे ईं० दक्षिणक
र्णे उं० वामकर्णे ऊं० दक्षनासापुटे ऋं० वामनासापुटे ॠं० दक्षगंडे लृं० वामगंडे लॄं० ओष्ठे एं० अधरे ऐं० ऊ
र्ध्वदंतपंक्तौ ॐ० अधोदंतपंक्तौ औं० शिरसि अं रसनायां अः नमः॥ दक्षदोर्मूले कं० कूर्परे खं० मणिबंधे
गं० अंगुलीमूले घं० अंगुल्यग्रे ङं० एवं वामे चं छं जं झं ञं दक्षोरुमूले टं० जानौ ठं० गुल्फे डं० अंगुलीमूले
ढं अंगुल्यग्रे णं० एवं वामपादे तं० थं० दं० धं० नं० दक्षपार्श्वे पं वामपार्श्वे फं पृष्ठे वं० उदरे मं हृदये यं दक्षांसे
रं ककुदि लं वामांसे वं हृदयादि दक्षांसे शं हृदयादि वामांसे षं हृदयादि दक्षपादे सं हृदयादि वामपादे हं
हृदयादि उदरे ळं हृदयादि मुखांते ॐ क्षं नमः इति दक्षांगुष्ठानामिकयोगेन न्यसेत्॥ इति मातृकान्यासः

२१

अथ पीठन्यासः। तत्र मूलाधारे ॐ मंडूकाय। स्वाधिष्ठाने ॐ कालाग्निरुद्राय। मणिपूरे ॐ मूलप्र
प्रकृत्यै। हृदये ॐ आधारशक्त्यै। तत्रैव कूर्माय। शेषाय। वराहाय। पृथिव्यै। विस्ये वे॰ ॐ क्षीर
समुद्राय। श्वेतद्वीपाय। शेषे तु सुधार्णवाय। रत्नद्वीपाय। गणेशपूजायां इक्षुसमुद्रा
य। रत्नद्वीपाय। मणिमंडपाय। कल्पवृक्षेभ्यो। मणिवेदिकायै। रत्नसिंहासनायै। दक्षि
णांसे धर्माय। वामांसे ज्ञानाय। वामोरौ वैराग्याय। दक्षोरौ ऐश्वर्याय। मुखे अधर्माय।
वामपार्श्वे अज्ञानाय। नाभौ अवैराग्याय। दक्षपार्श्वे अनैश्वर्याय। मध्ये ॐ अनंताय। प्रपंचपद्माय। आ
नंदकंदाय। संविन्नालाय। अष्टौ प्रकृत्यात्मकपत्रेभ्यो नमः। षोडशविकारात्मककेसरेभ्यो। पंचाशद्बी
जाढ्यकर्णिकायै। आँ आत्मने नमः। अँ अंतरात्मने नमः। पँ परमात्मने नमः। ह्रीँ ज्ञानात्मने। माँ मा
यातत्वाय। कँ कलातत्वाय। विँ विद्यातत्वाय। पँ परतत्वाय। श्रीविद्यायां तु पूर्वादिदिक्षु ॐ

पृथिव्याधिपतये ब्रह्मप्रेताय। जलाधिपतये विष्णुप्रेताय। तेजोधिपतये रुद्रप्रेताय। वायव्याधिपतये
ईश्वरप्रेताय। मध्ये आकाशाधिपतये सदाशिवप्रेताय॥ तत्रैव ॐ॥ सुधार्णवासनाय। पोतांबु
जासनाय। दिव्यासनाय। चक्रासनाय। सर्वमंत्रासनाय। साध्यसिद्धासनाय। श्रीचक्रराजाय
नमः इति विशेषः॥ ततो मूलेन प्राणानायम्य॥ प्राणायामविधानं तु ज्ञानार्णवे॥ आसने स
म्यगासीनो वामेनापूर्य चोदरं॥ कुंभकेन त्रिरावृत्य दक्षिणेन तु रेचयेत्॥ कनिष्ठानामिकांगु
ष्ठैर्यन्नासापुटधारणं॥ प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विनेति॥ ततो ऋष्यादिन्यासः॥
संग्रहे॥ छंदऋषिदेवताज्ञानं न्यासध्यानं तथार्चनं॥ सार्धमंत्रजपं कृत्वा बाह्यार्चनं समाचरेदि
ति॥ प्रपंचसारटीकाकारेण॥ अनुक्तबीजशक्तिविशेषाणां मंत्राणां। प्रणवो बीजं॥ भूतिः
शक्तिरिति॥ विवरणकारैस्तु हमिति बीजं॥ सः इति शक्तिः॥ सर्वमंत्रस्यापि प्रकाति देवता
अधिष्ठात्री देवता॥ अभिमानी देवता चेति देवतात्रैविध्यमस्ति॥ यथा गायत्रीमंत्रस्य

सूर्यश्च॰ नारायणश्च॰ शक्तिश्च॰ एवं सर्वत्रानुक्रमस्थले गुरुमुखादवगंतव्यं॥ अमुक ऋषये नमः॥
शिरसि छंदसे नमः मुखे अमुकदेवतायै नमः हृदये। बीजाय॰ नाभौ शक्तये नमः पादयोः की
लकाय सर्वांगेषु॥ प्रपंचसारसंग्रहे बीजं दक्षिण स्तने शक्तिं वामस्तने कीलकं जीवः एतद्वये
हृदि मंत्रदेवता प्रकाशिकायांतु बीजं शक्तिश्च मूलाधारे न्यसेत् मम चतुर्विधपुरुषार्थसि
द्ध्यर्थे जपे विनियोगः॥ मूलेन करशुद्धिं कृत्वा यथोक्तविधिना ध्यात्वा प्रागुक्त मानसोपचा
रैः संपूज्य बाह्याराधनं कुर्यात्। तत्रादौ प्रतिमा॥ बालबोधे शालिग्रामं शिला यांच तत्तद्बु
धा समाचरेत्॥ शैवागमे॥ लिंगस्थंडिलयोर्वह्नौ सूर्य विष्णुपटेषु च॥ मंडपे फलके मूर्त्यां ह
दये दर्पणेऽर्चितिर्वा॥ एषुस्थानेषु देवेशि यजंति परमं शिवं॥ त्रैलोक्यसंमोहनतंत्रे॥ शालिग्रा
मे मणौ यंत्रे स्थंडिले प्रतिमासु च। हरेः पूजा तु कर्तव्या केवले न तु भूतले संग्रहे॥ लिंगं॰ सू
र्यं॰ शंख॰ चक्रे॰ शालग्रामं हृद्यं हृद्यं। त्रयं त्रयं गणेशे गोमे॰ गृहे ना चैवं गृहस्थकैः बाणलि

१३

गादौ तु आवाहनं उद्वासनं विसर्जनं च न स्यात्॥ तत्रावाहनं नाम स्वाभिमुखीकरणं॥ विसर्जनं नाम स्वालीने
न भावनं॥ इति विशेषः॥ अर्णवे तु॥ बाणादौ पूजने विशेषः॥ आवाहने तु ॐ स्वाभिमुखो भव तु भग
वन्महादेव इति विसर्जने तु यथोचितं तिष्ठ तु भगवान् महादेव इति॥ अन्यत्समानं॥ योगिनीतं
त्रे॥ लिंगस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च॥ मंडलस्थां महादेवीं यंत्रस्थां प्रतिमासु च॥ ज
लस्थां चा शिलास्थां वा पूजयेत् परमेश्वरीं इति॥ मत्स्यसूक्ते॥ अनुक्तकल्पयंत्रे तु लिखेत्सप्त
दलाष्टकं॥ षट्कोणकर्णिकं चतुर्वेदद्वारोपशोभितं इति॥ अष्टदलपद्म
लेखनं तु अपहारीयं तत्र एवंभूतं भूतादीतीयं चतत स्वतुर्थं स्वतु
र्थं आद्यं पुनरेव मेव योगेन चेद् ष्टदलं च पद्मामिति अथासिद्धे स्वरीतं श्रीप्र
णम्य श्रीगुरुं भक्त्या साधकः कुंकुमादिभिः॥ स्वर्णादिरचिते पीठे
पूजाचक्रं समुद्धरेत्॥ संस्थाप्य पुरतो देवीं शुभे पीठे सुस्थिरे॥ दद्यात्पुष्पा



सामान्यार्घ्यस्थलं २

विशेषार्घ्यस्थलं २

१३

जलिं तत्र मूलमंत्रेण साधकः॥ इति अथपात्रस्थानं॥ स्वपुरतः ह्रिं विद्वामाग्रे त्रिकोणवृत्तभूबिंबं विलि
ख्य तत्र त्रिपादिकामाराप्य फडिति शंखं वाऽर्घ्यं प्रक्षाल्य तदुपरि संस्थाप्य नमः इति मंत्रेण गंधपुष्पाक्ष
त दूर्वादितत्वानि॥ क्षिप्य मूलेन पूरयेत्॥ ततो ॐ गंगे च यमुने चैव इत्यादिना तीर्थान्यावाहनं अणवं
वा मूलमंत्रं अष्टधा जप्त्वा धेनुमुद्रां प्रदर्शयेत्॥ इति सामान्यार्घः १ अथ विशेषार्घः॥ आत्मदेवतयो मध्ये सा
मान्यार्घजलेन त्रिकोणवृत्तषट्कोणचतुरस्रमंडलं कृत्वा ॐ विशेषार्घमंडलाय नमः इति संपूज्य तत्र
त्रिपादिकां संस्थाप्य ॐ मं वह्निमंडलाय धर्मप्रददशकलात्मने श्रीअमुकार्घाधाराय नमः इति संपूज्य
यं धूम्रार्चिषे नमः रं ऊष्मायै · लं ज्वलिन्यै · वं ज्वालिन्यै · शं विस्फुलिंगिन्यै · षं सुश्रियै · सं सुरूपायै · हं क
पिलायै · लं हव्यवाहायै क्षं कव्यवाहायै · इति दशकलास्संपूज्य ततो स्त्रमंत्रेण स्वर्णादिनिर्मितं
पात्रं प्रक्षाल्य तत्र संस्थाप्य ॐ अं सूर्यमंडलाय अर्थप्रदद्वादशकलात्मने श्रीअमुकार्घपात्रा
य नमः इति तत्र संपूज्य॥ कं भं तपिन्यै · खं बं तापिन्यै · गं फं धूम्रायै · घं पं मरीच्यै नमः ङं

१४

नँ ज्वालिन्यै · चँ धँ रूच्यै · छँ दँ सुषुम्नायै · जँ फँ भोगदायै · झँ नँ विश्वायै · ञँ णँ बोधिन्यै · टँ ढँ धारिण्यै ठँ
क्षमायै · इति द्वादश कलाः समावाह्य ततः पात्रसंस्थारकां सबिंदुकं जप्त्वा मूलमंत्रं त्रिवारं जपु
त्पूरयेत् ॥ ॐ उँ सोममंडलाय कामप्रद षोडशकलात्मने श्री अमुकपात्रामृताय नमः इति जलं
संपूज्य ॐ अँ अमृतायै · आँ मानदायै · इँ पूषायै · ईँ तुष्ट्यै · उँ पुष्ट्यै · ऊँ रत्यै · ऋँ धृत्यै · ॠँ शशि
न्यै · लृँ चंद्रिकायै · ॡँ कांत्यै · एँ ज्योत्स्नायै · ऐँ श्रियै · ॐ प्रीत्यै · औँ अंगदायै · अँ पूर्णायै · अः पू
र्णामृतायै · इति षोडश कलाः समावाह्य ॥ प्राग्वत्सूर्यमंडलस्थानं प्रकरणोक्तविधिनाती
र्थमावाह्य ॥ मूलमंत्रेण अर्घ्यजले संयोज्य स्वहृदयाद्देवतां तत्रावाह्य हुँ इत्यवगुंठ्य वषट् इति
गालिनीमुद्रां प्रदर्श्य वौषाडिति तज्जलं निरीक्ष्य षडंगमंत्रैः संकलीकृत्य गंधपुष्पाभ्यां नमः इतित
त्रैवतां संपूज्य तदुपरि मत्स्यमुद्रया छाद्य मूलमंत्रं अष्टधा जपेत् ॥ ततो वामितिमंत्रेणाधेनुमु
द्रां प्रदर्श्य अस्त्रेण संरक्ष्य तस्मात् किंचिज्जलं प्रोक्षणीपात्रे नीधाय तेनोदकेनात्मानं पूजोपक

रणं च मूलेनाभ्युक्ष्य इति विशेषार्घ्यस्थापनं २ ततो पूजा मूर्तेर्मलापकर्षणं स्नपनं कृत्वा तां पीठे स्था
पयित्वा तत्र पुष्पादिकं प्रक्षिप्य पीठपूजां कुर्यात्॥ तत्रादौ देवस्य दक्षिणभागे ॐ ७ गुं गुरुभ्यो॰ ॐ ७
पं परमगुरुभ्यो॰ ॐ ७ पं परात्परगुरुभ्यो॰ ॐ ७ श्रीविद्यायां तु पूर्वोक्तपादुकामंत्रांते अमुकानंदनाथगुरु
भ्यो नमः॥ इत्यादि संपूज्य॥ ततो देवस्य वामभागे ॐ ७ गं गणपतये नमः॥ अथ पीठमध्ये मंडूकाय॰ काला
ग्निरु[illegible]य॰ मूलप्रकृत्यै॰ आधारशक्त्यै॰ कूर्माय॰ शेषाय॰ पृथिव्यै॰ वेलवे॰ ॐ क्षीरसमुद्राय॰ श्वेतद्वीपाय॰
शैव[illegible]जायां क्षीरसमुद्रस्थापने ॐ सुधार्णवाय॰ तस्मिन्नवरत्नमयद्वीपाय॰ गणेशपूजायां इक्षुसमु
द्राय[illegible]लद्वीपाय॰ इति विशेषः मणिमंडपाय॰ कल्पवृक्षेभ्यो नमः॰ मणिवेदिकायै॰ रत्नसिंहासनाय॰ अग्नि
कोणे [illegible]य॰ नैरृतिकोणे ज्ञानाय॰ वायुकोणे वैराग्याय॰ ईशानकोणे ऐश्वर्याय॰ पूर्वादिचतुर्दिक्षु अध
मा[illegible]ज्ञानाय॰ अवैराग्याय॰ अनैश्वर्याय नमः मध्ये ॐ अनंतादि ह्रीं ज्ञानात्मने नमः इत्यंतं संपूज्य

१५

॥ स्कंदे॰ विनायकं विना तीर्थं विशुद्धानं चैव नानघ॥ दुर्गादिदेवपूजायां नपध्यानं बुधपुष्पनः॥ अनेके पासन्ति ते श्च स्वा[illegible]
ध्यानत्तीनमं॥ एव साध्यते लोके मंत्र मानेण पूजनादपि॥ तस्मात्कलियुगे घोरे धनविद्या विवर्जिताः॥ नराः कुर्वंति देवानां
पत्यादि पालित इति॥
श्री[illegible]पासेकश्चे सूर्वो कृप्रेतासनां तं संपूज्य॥ पूर्वादिकेशारे षु मध्ये चतुर्भुजस्यो कृपीठ चाक्रीः संपूज्य मध्ये पीठमनुं च पू
जयेत्॥ [illegible] अत्र प्राच्यादि निमस्तु॥ विष्णुयामले॥ पूज्यपूजकयोर्मध्ये प्राची प्रोक्ता विचक्षणैः॥ प्राचीव प्राचीसो
दि[illegible]स्तु कृत्वा देवपूजनं॥ ततो राम्युपासने न मूलमंत्रेण करांभ्यां पुष्पांजलिं आदाय पद्म दांवा लिंगमुद्रा योनि
निमुद्रा वा बध्वा मूलांते अमुकदेवतायै॰ अवाहनं १ आसनं कल्पयामि २ पादयोः पाद्यं दद्यं ३ हस्ते ऽर्घ्यं क॰ ४ मुखे आच
मनीयं क॰ ५ स्नानं शिवो पार्षपात्रान्नां गाद्वस्त्रं क॰ ७ आभूषणं क॰ ८ गंधं क॰ शिवोपासने केवलं तुलसामक्षत्रं इति कुंभसाधा
रण मंत्रः ९ पुष्पं क॰ १० धूपं क॰ ११ दीपं क शिवोपासके श्चेत्॥ ईशानः सर्वविद्यानां इत्यादि पंचमंत्रैः पंचवलिषु पंचदीपा
प्रदर्शयेत्॥ पुनरेतैरेव [illegible]नादिभिः पंचशक्तिदीपान् प्रदर्शयेत्॥ १२ नैवेद्यं क॰ १३ पुनराचमनीयं क॰॥ तांबूलं क॰ १४
फलं क॰ १५ मंत्रपुष्पांजलीं क॰ त्वमग्ने रुद्रो असुरो महो दिवस्त्वं इत्यादि सूक्तेश्च यो देवानां इत्यादि सूक्तेश्च मंत्रपुष्पांजलिं वा समर्पया
त्॥ विष्णुविषये चरणं पवित्रं इत्यादि सूक्ते पुष्पांजलिं दद्यात्॥ इति षोडशोपचारैः संपूज्य परिवारपूजनं कुर्यात्॥
देषां विलंमते पुष्पानंतरं परिवारपूजा॥ तत्र अग्नीशा वायुकोणे मध्ये दिक्षु षडंगपूजनं कुर्यात्॥ ततो यथास्थितानां १८
४ पाद्यपात्रे लवंग १ उशीर २ चंदन ३ नागकेसर ४ कुंकुमानी ५ क्षिप्ता पादयोः अर्पयेत्॥ अर्घपात्रे कुशाग्र १ दूर्वा २ विष्णुक्रांता
४ कर्पूर ४ चंदन ५ श्वेत सर्षपान् निक्षिप्य अंजलौ अर्पयेत्॥ आचमनपात्रे कर्पूर १ लवंग २ वेला ३ तजपत्रं ४ निक्षिप्य मुखे अर्पयेत्

स्ववक्त्राभ्यामष्टदिक्षु क्रमेण ॐ इंद्राय नमः अग्नये· यमाय· निर्ऋतये· वरुणाय· वायवे· सोमाय· ईशा
नाय· ततो निर्ऋतिवरुणयोर्मध्ये अनंताय· इंद्रेशानयोर्मध्ये ब्रह्मणे नमः संपूज्य इंद्रादीनां स
मीपे ॐ वज्राय· शक्त्यै· दंडाय· खड्गाय· पाशाय· अंकुशाय· गदायै· त्रिशूलाय· चक्राय· पद्माय·
इत्यावरणार्चनं कृत्वा मूलांते ॐ सांगाय· सावरणाय सवाहनाय सायुधाय श्रीअमुकदेवाय नमः गं
धं पुष्पं· धूपं· दीपं· नैवेद्यं· इति पंचोपचारैः संपूज्य शाल्युपास कभ्येतुः सांगाय· अमुकदेवन·
इति विशेषः घंटामंत्रस्तु ॐ जय ध्वनिमंत्रमातः स्वाहा इति मंत्रेण घंटां संपूज्य वामकरेण घंटां वादयन्
धूपदीपौ देवस्य दक्षभागे· तैलदीपं वामभागे· ततो तांबूलं च दत्वा नित्यहोमं कुर्यात्· तत्र प्राङ्मु
खो उदङ्मुखो वा आसने उपविष्टः शौदेकाले सवित्र्यं श्रीअमुकदेवताप्रीत्यर्थं नित्यहोमं तंत्रं करिष्ये· कुं
डं स्थंडिलं वा गोमयेनोपलिप्य नित्यहोमे नवांगुलप्रमाणं कुंडं स्थंडिलं वा कुर्यादिति रुद्रयामले ततः पू
र्वान्त्यमोर्मातः उदगग्रास्तिस्त्रः रेखाः तथा प्रागग्रास्तिस्त्रः दक्षिणादिउदगंताः यज्ञियकाष्ठमूलेन



लिखित्वा तत्काष्ठं बहिः त्यजेत् ।। तत्र प्रणवेनाभ्युक्ष्यासिद्रेण बाहुरिद्रया वाधान्यपि स्वेन त्रिको
णं षट्कोणं अष्टदलं चतुरस्रं चतुर्द्वारं मंडलमालिख्य प्रणवेन मध्यपुष्पं दद्यात् ततो मूलं
ते कुंडाय नमः कुंडं संपूज्य ।। कुंडे रुतुस्नातां ग्राम्यधर्माभिरतां परान्द्रीव युतां भुवनेश्वरीं
[illegible]त्वा मूलविद्यया उर्वयेत् ।। वेस्मवेतु परान्द्रीव स्थाने नारायणं भुवनेश्वरीं स्थाने
म[illegible]लक्ष्मीं ध्यायेति विशेषः ।। ततो मत्स्यमात्रादो मूलेनाग्निमादाय स्थंडिले विधाय ॐ
ॐ सोहं वह्निचैतन्याय नमः इति मंत्रेण भुवनेश्वरीगर्भे प्रविष्टइति विचिंत्य ॐ इति प्रण
वेन पंचदर्भासं स्थान् विभाव्य पंचदर्भाज्यालातीर्हुत्वा अमुकाग्निरिति नाम दत्त्वा ॐ वैश्वा
नर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति मंत्रेण पंचोपचारैः संपूज्य
आज्यमानीय वैश्वानरमतीकृत्य मूलेन त्रिवारमभिमंत्र्य ॐ हुताशनाय स्वाहा इति सकृदा
ज्यं जुहुयात् ततो ॐ भूः स्वाहा अग्नय इदं ॐ भुवः स्वाहा वायव इदं ॐ स्वः स्वाहा सूर्याय इदं

भूर्भुवस्व स्वाहा प्रजापतय इदं० ततो वह्निदेवतात्मनामैक्यं विभाव्य सर्वदेवानां तत्रावाह्य सं
पूज्य धौम्रेन मंत्रेण पंचविंशतिवारं आज्येनहुत्वा तस्मिंदेवतां लक्ष्मांक्ति तमंत्रैः सकृत्संहुत्वा
तदन्ते मूलेन सांगाय सावरणाय सायुधाय सवाहनाय श्री अमुकदेवतायै स्वाहेति त्रि
वारं हुत्वा शांतिहोमे तु सांगायै सादि श्री अमुकदेव्ये स्वाहेति ततः षडंगे षडाहुती र्जुहुयात् ॥
हो[..] समासो महाव्याहृतिहोमः ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा ॥ भुवो वायवे चांतरि
क्षा[य] च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवस्सुवश्चंद्रमसे च नक्षत्रेभ्य
श्च [दि]ग्भ्यश्च महते च स्वाहा इत्याहुतिचतुष्टयं हुत्वा ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो
जा[ग्र]त्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यदुक्तं यत्स्मृतं
य[त्कृ]तं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ब्रह्मार्पणमंत्रेण पूर्णाहुतिं हुत्वा अग्निं प्रार्थ्य तत्रावाहि
तदेवतास्स्वात्मन्युद्वासयेत्० ततः सामान्यार्घजलेनाग्निं परिषिच्य संपूज्य न्युनातिरिक्तसि

घ्यं ऽर्थं ददामि सघृतं तिलं ॥ ॐ हुँ सांगं कुरु कुरु स्वाहा ॥ इति तिलैर आहुतिं दत्वा ॐ भो भो वह्ने महाश
क्ते सर्वकर्म प्रसाधक । कर्मांतरेऽपि संप्राप्ते सांनिध्यं कुरु सादरं ॥ इति प्रार्थ्य ॥ संहारमुद्रया स्वा
त्मन्युद्वासयेत् ॥ इति संक्षिप्तं तांत्रिकाग्निहोमविधिः ॥ अथ बलिदानं ॥ द्वारस्य ईशानकोणे
स[...]न्यार्घ्यवन्मंडलं कृत्वा ॐ बटुकदेव बलिं गृहाण स्वाहा इति नाराचमुद्रां प्रदर्श्य योनिमुद्र
य[...]मेत् ॥ आग्नेयकोणे पूर्ववत् मंडलं कृत्वा ॐ यां योगिनीभ्यः स्वाहा योगिनी बलिः नाराचयोनि
मुद्र[ां] प्राग्वत् नैर्ऋत्यकोणे पूर्ववत् मंडलं क्षं क्षेत्रपालाय हों स्वाहा क्षेत्रपाल बलिः ना
राचयोनिमुद्रां प्राग्वत् ३ वायव्ये पूर्ववत् मं गं गणपतये स्वाहा गणेश बलिः नाराच
योनिमुद्रां प्राग्वत् ४ मध्ये मंडलं पाद्यादिः पूर्ववत् मं ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः
हुँ स्वाहा इति सर्वभूत बलिः ५ पृथक् पात्राभावे तु एकपात्रे एक बलिं पंचकं दद्यात्
इति संक्षिप्त बलिदानं । ततो मूलेन पुष्पांजलित्रयेण देवं संपूज्य नीराजनं कृत्वा ॐ अक्षमालायै नमः १८

नि ।
द्वारस्य
आ
ई

श्रीविद्योपासकः श्वेत ब्रह्मांडे । देव्याः पुष्पांज
लिद्वयासहस्राक्षर विधया । नो चेत् सूत्रनव्य
मिसांऽपुवे देवदिनाः ॥ विष्णूपासकः श्वेतकौस्तु
भमंत्रेण पंच पुष्पांजलिं दद्यात् ॥ ६

रातिमालां संपूज्य ॐ मां माले महामाये सर्वशक्तिसमन्विते। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव इति नत्वा
ॐ सिद्ध्यै नमः इति संगृह्य शिरसि गुरुं स्मृत्वा मंत्रसिध्यर्थं स्वेष्टदेवतारूपं ध्यात्वा मूलं अष्टोत्तरश
तं जपेत् जपांते ॐ ह्रीं सिद्ध्यै नमः इति संगोप्य शिरसि संधार्य ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा म
ता॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति। नमस्कुर्यात् ततो जपसमर्पणं हृदयादि षडंगं कृत्वा य
थोक्तविधिना ध्यात्वा ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥ इति जपं
गुस ५ समर्प्य सहस्रनामस्तोत्रादिभि स्तुत्वा प्रदक्षिणनमस्कारैस्तोषयित्वा शक्तिपूजां॥ ॐ कात्यायन्यै विद्म
हे कुमार्यै धीमहि तन्नो दुर्गा प्रचोदयात् इति गायत्र्या कुमारीं पंचोपचारैः संपूज्य। ततो देवतां आवरण
दे[illegible]॥: विसर्ज्य क्षमस्वेति विसृज्य संहारमुद्रया तत्तेजः पुष्पसार्धं स्वहृदयमानयेत्। ततः ऐशान्यां मंड
ले ...कं तानि मात्स्य त्रोषदधातु यथा वैभवे ॐ विष्वकुत्रो नमः शाक्ते ॐ शेषिकायै नमः शिवे ॐ चंडेश्व
राय नमः इति सूर्ये ॐ तेजश्चंडाय नमः गणेशे ॐ उच्छिष्टगणेशाय नमः इति ततो मूलेन पादोदकं पीत्वा नैवे
द्यं किंचित् स्वीकृत्य अन्यथा यथायोग्यं यादत्वा यथासुखं विहरेत्। अथ तंत्रसारसंहितायां आराधनासमथ

१८ श्वेद्र पादर्चनसाधनं। योदातुं नैव शक्नोपि कुर्याद्दिव्यदृष्टिनं दर्शनं। नैवेद्यंतु यस्य यद्विधेयं सो धोयात्तेनवनान्यथा
...त मीये। रविवारे घृतान्नं च पयो मुक्तं निवेदयेत्। सोमवारे पिष्टकानि सितया मतयोजयेत्।। मंग
ले गुडसंमिश्रं अन्नं बहुगुणान्वितं। बुधवारे यावकैस्तु गुरौ च घृतसंभवैः मुद्गान्नं शुक्रवारे च शनौ स
...पायसम्। इति वारपूजा। अथ मासपूजा। चैत्रे मासि वासुदेवं सर्गपुष्पैस्समर्चयेत्।। पौर्णिमास्यां
यतसद्भक्त्या दमनेश्च सुगुच्छकैः।। अस्मिं दिने रतिकामं पूजयेद्युतिनत्सरः।। न चेत्सांवत्सरी पूजाव
थाभवति निश्चयत्।। वैशाखे मासि विधिवत्तर्पयेद्दिवं जलैः २ ज्येष्ठमासि श्रयेलेन फलैस्सम्पू
जयेद्धरिम्।। आषाढे मासि विधिवत्पवित्रैः पूजयेद्विभुं।। एकैकं स्वगस्त्राणि ग्रंथियुक्तानि कारयेत्।। अ
थ वाहस्तशालिश्च ग्रंथियुक्तानि वा पुनः। पूजांते देवदेवाय मंत्रयोज्यो निवेदयेत्।। विप्रेभ्यस्तथा
दद्यात् महालं वत्सरं यजेत्। तत्र षवयेद्धूपभोज्येश्च ब्राह्मणाशंसितं जनान्।। एवं संवत्सरं श्रीहरि
नैष्टमवाप्नुयात्। न चेद्दर्पकृता पूजा वास्ता भक्ष्याय कल्पयेत्। श्रावणे मासि कृत्स्नं तु पुष्पैस्तु केत
कोद्भवैः।। चंद्रचंदनकुस्तोरीकुंकुमादिसुवासितैः।। एलालवंगकंकोलफलानि बहुधार्पयेत्।। भाद्रमा १८

सेयजेत्कृष्णं भक्ष्यै बहुगुणान्वितैः ६ इषेमासियजेद्भक्त्या भक्ष भोज्यैस्सुविस्तरैः ॥ कार्प्पासनिर्मितैर्वस्त्रै नाना
भरणसंयुतैः ७ तुलास्थे भास्करे कृष्णं पूजयेमासमाकं तु ॥ रात्रौ प्रदीपेहोमैश्च दुग्धपिष्टादिसंयुतैः ॥ ८ न
दीपमविच्छिन्नं दद्यान्मासं महोज्वलं ॥ एकादश्यामुपोष्यैव द्वादश्यां पारणे दिने । वस्त्रकायाविभुमभ्यर्च्यैव
स्त्रालंकरणादिभिः ॥ ७ प्रस्यातिथैस्तु मातिमान् वार्षिकोत्सवमाचरेत् ॥ श्रीभोज्यानि बहु भक्ष्याणि ब्राह्मणे
भ्यो निवेदयेत् ॥ एवं कृते देवतास्य तुष्टा चेष्टं प्रयच्छति । स सत्लोकमवाप्नोति पुनरावृत्तिवर्जितं ॥ ८ मार्गसि
र्षेयजे देवं नवान्नैर्व्यंजनै शुभैः ॥ नारिकेलफलक्षोदमिश्रितं गुडजिरकैः सुपक्कं देवदेवाय भक्त्या तस्मै
निवेदयेत् ॥ पौषे सिमोन्च माषं वैष्टतापुपैः प्रपूजयेत् ॥ माघेमासियजेत्कृष्णं अक्षतैः सुशुभैः सितैः
दुग्धान्नं शर्कराभुक्तं इष्टान्नं च निवेदयेत् ॥ अस्मिन्मासि शुभे शालेवस्त्रेणाच्छादयेद्विभुं ॥ फाल्गुने देव
केशवं पूजयेत्स्वर्णचंपकैः ॥ तुलसीगंधिकुसुमैर्धूपदीपैस्सुविस्तरैः ॥ १२ ॥ द्वितीयोल्हासः ॥ २ अथ
गणेन्द्रमंत्राः ॥ ॐ श्रीँ ह्रीँ क्लीँ ग्लैँ गँ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा २८ अर्णैः गणपतये २

१९ संबध्यंतपक्षे २८ अर्णः अस्य श्रीमहागणपतिमहामंत्रराजस्य गणक ऋषिः गनिचृद्गायत्री छंदः । श्रीमहागणप
तिर्देवता गं बीजं । स्वाहा शक्तिः चतुर्विधपुरुषार्थसिध्यर्थे जपे विनियोगः ॐ गां अंगुष्ठ्योः श्रीं गीं तर्जनी
भ्योः ह्रीं गुं मध्यमयोः क्लीं गौं अनामिकयोः ग्लौं गैं कनिष्ठिकयोः गं गः करतलकरपृष्ठयोः ॐ गां
हृदयाय नमः श्रीं गीं शिरसे स्वाहा । ह्रीं गुं शिखायै वषट् । क्लीं गैं कवचाय हुं । ग्लौं गौं नेत्रत्रयाय वौषट् ।
गं गः अस्त्राय फट् । इति मूलेन व्यापकं कृत्वा ॥ अथ ध्यानं हस्तीद्राननमिंदुचूडमरुणच्छायं त्रिनेत्रं रसादा
श्लिष्टं प्रियया सपद्मकरया स्वांकस्थया संततं ॥ बीजापूरगदाधनुः शिखिनिषयुक्चक्राब्जपाशोत्प
लव्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहंतं भजे ॥१॥ इति ध्यात्वा मानसोपचारैः संपूज्य प्रागुक्त
पीठे तीव्रायै नमः ज्वालिन्यै नमः नंदायै कामरूपिण्यै उग्रायै तेजोवत्यै सत्सभामायै विघ्ननाशि
न्यै नमः इति पीठशक्तिः आवाह्य ॐ श्रीं गं सर्वशक्तिकमलासनाय नमः इति मंत्रेण पीठं संपूज्य
प्रागुक्तविधानेन देवं तत्रावाह्य १६ संपूज्य अथावरणपूजा त्रिकोणमध्ये देवं संपूज्य त्रिकोणषट्को
१९

णयोरंतराले प्रागादिदेवस्य चतुर्दिक्षु ॐ श्रीं गं रमारमेशाभ्यां नमः ॐ ह्रीं गं गिरिजावृषांकाभ्यां नमः॥
ॐ क्लीं गं रतिपुष्पबाणाभ्यां नमः ॐ ग्लौं गं महीवराहाभ्यां इति प्रथमावरणं १ अथ षट्कोणेषु प्रागादि
क्रमेण ॐ श्रीं गं सिद्धिआमोदाभ्यां ॐ श्रीं गं समृद्धिप्रमोदाभ्यां ॐ श्रीं गं कांतिसुमुखाभ्यां ॐ क्लीं गं मद
नद्रवाविघ्नाभ्यां ॐ क्लीं गं द्राविणीविघ्नकर्तृभ्यां षट्कोणपार्श्वयोः ॐ ह्रीं गं वसुधाराशंखनिधिभ्यां ॐ
ग्लौं गं वसुमतीपद्मनिधिभ्यां इति द्वितीयावरणं २ अंगैस्तृतीयावरणं ३ अथाष्टदलमध्ये ॐ असितां
गभैरवाय रुरुभै॰ चंडभै॰ क्रोधभै॰ उन्मत्तभै॰ कपालीभै॰ संहारभैरवाय नमः दलाग्रेषु ॐ ब्राह्मै नमः माहे
श्वर्यै कौमार्यै वैष्णव्यै नमः वाराह्यै माहेंद्र्यै चामुंडायै महालक्ष्म्यै इति चतुर्थावरणं ४ इंद्रादिभिः पंचमा
वरणार्चनं ५ ततोशेषं प्रागुक्तविधिना समाप्य अथ पुरश्चरणे वक्ष्योक्तचक्रे संख्याक्षेतायां द्विगुणस्य
ता॥ पारे त्रिगुणा प्रोक्ता द्वलीसंख्या श्वरं गं चरतुर्भ्य चारिवासहस्रयुक्तं च लुलक्षजपः॥ अष्टद्रव्यैर्दशांश
होमः [illegible] नित्यइक्षवः सक्तवो रंभाफलानि चिपिटयस्तिलामोदकानि नारिकेलानि लाजद्रव्याष्टकं स्मृतं रंभा
कदली चिपिटाः पृथुकाः अथ तर्पणं मंत्रराशेः तर्पयेद्विघ्नराजं विघ्नं प्रागुक्तेनैव वर्त्मना॥ चतुश्चत्वारिं

२०

त्रादशाधिकं स्तुः चातं चतुष्क चा रिंशं द्वारं वा। गँ गणपतेरां तर्पयामि इति प्रयोगः अथ काम्यतर्पणं। सर्वा
भिष्ट प्रदं वक्ष्ये चतुरावृत्ति तर्पणं। एकांते विजने रम्ये सर्वोपद्रव वर्जिते कृतस्नानादिको मंत्री पूर्ववत्तन्य।
ससंयुतः। तडागमध्ये संचिंत्य पुष्पितं नालिनीवनं। तस्य मध्ये महापद्मं तरुणादित्य संनिभं॥ स
मु[illegible] सुगंधाढ्यं रमणीयं मनोहरं। सद्यो विकसितं ध्यायेन्मंत्री पूर्वोक्त मंत्रवत्। शुद्धरजस सोमाग्नं
पंत्यं तं रविमंडलात्। विनिर्गत्यावरुह्याथ कर्णिकामध्य संस्थितं इति ध्यात्वा सावरण महागणपति सु
धीः। प्रवरैर्गंधकुसुमैः समभ्यर्च्याथ पूर्ववत्। निधाय पुष्करमुखं साधकेंद्रस्य मूर्द्धनि। वर्षंतं रत्नधाराभि
र्ध्यात्वादेवस्य मूर्द्धनि। चंद्रचंदन काश्मीर कस्तूरी लोलितैर्जलैः। तर्पयस्य याभक्त्या देवदेव प्रसन्नधीः।
एवं ध्यात्वा मूलमंत्रान्ते श्रीमहागणपतिं तर्पयामि इति चतुर्वारं संतर्प्य। ४ ततः श्रीं श्रीयया सहितं श्रीपतिं
तर्पयामि। ४ पुनर्मूलेन ४ ह्रीं गौर्या सहितं गौरीपतिं तर्पयामि। ४ पुनर्मूलेन क्लीं रत्या रत्यापतिं ४ पुनर्मूलेन
ग्लौं भुवा सहितं वराहं ४ पुनर्मूलेन श्रीं लक्ष्मी सहितं गणपतिं ४ पुनर्मूलेन गं सिद्धि सहितं आमोदं ४ पुनर्मू
लेन ४ गं समृद्धि सहितं प्रमोदं ४ पुनर्मूलेन ४ गं कांति सहितं सुमुखं ४ पुनर्मू गं मदनावती सहितं दुर्मुखं ४

२०

पुनस्तेन ४ गँ मदद्रवासहितं विघ्नं ४ पुनः गँ द्राविणी सहितं विघ्नकर्तारं ४ पुनः ४ त्रां वसुधासहितं त्रां स्वनिधिं ४ पुनः
एवं १०४ आवर्तिः तर्पणेनामुना स्वीयमिष्टमाप्नोति मंडलात् ४१ इति तर्पणं अथ धारणयंत्रं षट्कोणमध्ये
त्रिकोणं त्रिकोणमध्ये प्रणवं प्रणवमध्यगतं गँ बीजं त्रिकोणषट्कोणयोरंतराले प्रागादि ४ दिक्षु एवं बीजं
जं श्रीँ ह्रीँ क्लीँ ग्लौँ इति षट्कोणेषु प्रागादिषु ॐ श्रीं ह्रीं क्लीं ग्लौं गं इति षट्कोणांतरालेषु षडंगमंत्रान् अष्ट
रदलं तद्दलेषु षट्सु ॐ श्रीँ [illegible] ह्रीं क्लीं ग्लौं गँ समस्तमेतु गणपते वरवरद जष्टमेतु सर्वजनं मे वशमानय
स्वाहा तद्बहिः एतत्रयं आद्यवृत्ते मातृकाभिर्वेष्टयेत् द्वितीये आं मिति बीजेन तृतीये तु क्रोमिति वेष्ट
येत् तद्बहिः चतुरस्रद्वयं अष्टकोणेषु ओं मिति अन्या इति धारणयंत्रं अथ पूजायंत्रं त्रिकोणं तु कोणं वसु
पत्रं [illegible]षितं तद्बहिश्चतुरस्रं चतुर्द्वारोपशोभितं इति महागणपतिमंत्रविधानं १ अथ महालक्ष्मीविनायक
ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ सौम्यगणपतये वरवरद सर्वजनं मे वशमानय स्वाहा २ ऋ र्नः अंतर्यामी गणक ऋषिः
गायत्री छंदः लक्ष्मीगणेशो देवता श्रीं बीजं स्वाहा शक्तिः दीर्घयुक्तरमागणेशाभ्यां षडंगन्यासः श्रीं गां
इत्यादि ध्यानं दंताभयं चक्रवराखेदधानं नासाग्रगस्वर्णघटं त्रिनेत्रं धृताक्षमालिंगितमब्धिपुत्र्याल

मंत्र०
२९





श्री गणेशं वंदन का भ मीडे। इति
श्वा ला। पुजा ना दिकं महा गणप
ति मंत्रवत् वेद लक्षं पुरश्चरणं।
बिल्व समि द्भिः दशांशा होमः मंत्रो
त्तरां ॐ श्रीं गं सौम्याय महा गण
पतये वरवरद सर्वजनं मे वशमा
स्वाहा २८ र्णः यद्वा श्रीं गं सौम्या
य महा गणपतये वर वरद सर्व
जनं मे वशमानय स्वाहा २९ र्णः
अन्यत्सर्वं पूर्ववत् २ अथ विघ्न
गण पतिः ॐ श्रीं ह्रीं क्लीं ग्लौं गं
ह्रादि पश्चे हरू ४ गणपते येह ५ वर

राम
२९

वरद सर्वजनं मे वशमानय स्वाहा ४८ अर्णः दक्षिणामूर्ति ऋषिः देवी गायत्री छंदः श्रीविद्यागणपतिर्देवता।
गँ बीजं ह्रीं शक्तिः क्लीं कीलकं धर्मार्थकाममोक्षार्थे जपे विनियोगः ॐ ह्रीं गाँ हृदयादि षडंगः ध्यानं। हस्ताभ्यां बिभ्रा-
जमानं वरकनककमदाम्रं खड्गाभ्यां भुजाभ्यां बीजापूरादि बिभ्रद्रत्नकुंभं ललितं चंद्रचूडं त्रिनेत्रं॥ संध्यासिंदू-
रवर्णं स्तनभरनमितं तुंदिलं सान्नितंबं कंठादूर्ध्वं करीन्द्रं युवतिमयमधः स्तौमि विद्यागणेशं इति ध्यात्वा
गुरुपीठे देवं आवाह्य संपूज्यावरणार्चनं कृत्वा वक्ष्यमाणोक्तनवावरणपूजं कुर्यात्॥ इति विशेषः अन्य-
त्सर्वं महागणपतिवत् २ अथ वक्रतुंडमंत्रः ॐ वक्रतुंडाय हुं। ६ अर्णः अस्य भार्गव ऋषिः अनुष्टुप् छंदः। वक्र-
तुंडो देवता। वँ बीजं। यँ शक्तिः ॐ वं नमः हृदयादि षडंगः ध्यानं उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः पाशां-
कुशाभयवरान्दधतं गजास्यं। रक्तांबरं सकलदुःखहरं गणेशं ध्यायेत्प्रसन्नमखिलाभरणाभिरामं इति ध्या-
त्वा प्राग्गुरुक्रमात् महागणपतिपीठे देवं आवाह्य संपूज्य आवरणार्चनं कुर्यात् त्रिकोणमध्ये वक्रतुंडं षट्कोणे षडंगं
प्रथमावरणं अष्टदलमूले ॐ वक्रतुंडाय एकदंष्ट्राय महोदराय गजाननाय लंबोदराय विकटाय विघ्नरा-
जाय धूम्रवर्णाय इति द्वितीयावरणं २ अथाष्टदलाग्रेषु अणिमायै लघिमायै गरिमायै प्राप्त्यै प्राकाम्यै ईशिता-
यै वशितायै इति तृतीयावरणं। तद्बहिर्दिक्षु मदनकाय सलिलाय गुग्गुलाय कुरंडकाय ततो यं

२२ हं प्रिये । त्रिकोणमध्ये अथ बीजं संपुटं प्रणवेन च इति । ॐ तु लक्षं पुरश्चरणं ॥ त्रिकमधुप्रपंचसारे संहे विघ्न
ना... ध्योद्रं गुडज्व मिश्रितं तितिलैर्दद्वा जुहोम: । नित्यतर्पणं । सुगंध सुकुंकुमेयुक्तेन जलेन तर्पयेद्विभु
प्रयोगः ॐ वैं राय स्वाधाय नमस्तर्पयतु ॐ कैं निधिप्रदाय नमस्तर्पयतु ॐ नुं रत्नप्रदाय नमस्तर्पयतु ॐ
उं अन्नप्रदाय ० तु ॐ यैं रक्षोहणाय ० तु ॐ हं बलप्रदाय नमस्तर्पयतु इति तर्पणं ॥ अथ एकाक्षरस्य गं गणक ऋषिः
निचृच्छंदः । गणपतिर्देवता गकारो बीजं । बिंदुशक्तिः दीर्घयुक्तबीजेन षडंगः
गां इत्यादि अथ ध्यानं सिंदूराभं त्रिनयनं पृथुतरजठरं हस्तपद्मैर्दधानं दंतं
पाशांकुशेष्टान्युरुकरविलसद्बीजपूराभिरामं । बालेंदुद्योतिमौलिं करिपतिवद
नं दानपूरार्द्रगंडं भोगींद्राबद्धभूषं भजत गणपतिं रक्तवस्त्रांगरागं इति ध्यात्वा
महागणपतिपीठदेवं आवाह्य संपूज्य षट्कोणेषु ॐ आमोदाय ० प्रमोदाय ० सुमुखाय ०
दुर्मुखाय ० विघ्नाय ० विघ्नहर्त्रे नमः इति प्रथमावरणं १ प्रागादिषु ॐ महागणपते २२
ये ० गणपतये ० गणनायकाय ० गणक्रीडाय ० इति द्वितीयावरणं अथ २ अष्टदलमध्ये ॐ वक्रतुंडाय इति तृतीयावरणं ३



अष्टदलाग्रेषु ब्राह्म्यादिभिश्चतुर्थावरणं ४ लोकपालैः पंचमावरणं ५ इत्यावरणार्चा। अथ पूजायंत्रं। षट्कोणमष्टपत्रं च भू
पुरं च ततो लिखेत् वेदद्वारं भूपुरश्चरणं। पूर्वोक्ताष्टद्रव्यैर्दशांशहोमः। नित्यतर्पणं महागणपतिमंत्रवत्। अथ मंत्रा
न्तरं। ग्लौं इति एकाक्षरः। बालगणेशो देवता। ग्लां ग्लीं इत्यादि षडंगः। अस्यैकाक्षरवल्ल इति मंत्रदीपिकायां। तन्त्रसारे तु



ग्लौं एकाक्षरः। अस्य सर्वं महागणपतिवत्। षडंगस्तु षड्दीर्घयुक्तस्वबीजेनैव। अथास्य भेदाः
श्रीं ग्लौं हुं ग्लौं ह्रीं ग्लौं। क्लीं ग्लौं। क्लिं ग्लौं। ॐ ग्लौं गं ग्लौं एते त्र्यक्षराः। पूर्वं तास्वेते त्र्यक्षराः स्वा
तंत्राश्चतुरक्षराः। एतेषां सर्वं महागणपतिवत्। न्यासस्तु स्वबीजेनैव। ५। अथ शक्तिगणेशः
ॐ ह्रीं ग्रीं ह्रीं चतुरक्षरः। भार्गवऋषिः। विराट् छंदः। शक्तिगणेशो देवता। ग्रीं बीजं। ह्रीं
शक्तिः। दीर्घयुक्तेन बीजेन प्रणवाद्येन षडंगः। ॐ ग्रीं इत्यादि। ध्यानं। विषाणांकुशावक्षसू
त्रं च पाशं दधानं करैर्मोदकं पुष्करेण। स्वपत्न्या युतं हेमभूषाभराढ्यं गणेशं समुद्यद्दिनेशाभ
मीडे। इति ध्यात्वा पूर्वोक्तपीठे आवाह्य संपूज्य त्रिकोणमध्ये मूलांते शक्तिगणेशाय नमः। षट्कोणेषु अंगैः प्रथमा
वरणं। अष्टदलमध्ये ब्राह्म्यादिभिर्द्वितीयावरणं। लोकपालैस्तृतीयावरणं इति संपूज्य। पूजायंत्रं तु। त्रिकोष
ट्कोष्ठकं चैव चतुष्कं भूगृहं भवेत्। त्रिरेखाभिः समायुक्तं चतुर्द्वारं सुशोभितं। चतुर्लक्षपुरश्चरणं। मध्वक्तापूपैर्दशांशहोमः।

२३

मंत्रांतरं। ह्रीं ग्लौं ह्रीं अधरः। ग्लां ग्लीं इत्यादी षडंगः। ध्यानं। गजेंद्रवदनं साक्षाच्चलत्कर्णसुचामरं। हेमवर्णं चतुर्बाहुं

पाशांकुशधरं विभुं। स्वदंतं दक्षिणे हस्ते सव्ये चाम्रफलं तथा। पुष्करे कलशं चैव धारयंतमनुस्मरेत्। अस्यातु र्ववित

मंत्रांतरं। ह्रीं गं ह्रीं महागणपतये स्वाहा १२ वर्णः गणक ऋषिः। निचृद्गायत्री छंदः शक्तिगणेशो देवता। गं बीजं ह्रीं शक्तिः।

ह्रीं हृदये। गं शिरः। ह्रीं शिखा। महागणपतये कवचं स्वाहा नेत्रं। समस्तेनास्त्रं। ध्यानं मुक्तागौरं मदगजमु



खे चंद्रचूडं त्रिनेत्रं हस्तैः स्वीयैर्दधतममराविंदांकुशौ रत्नकुंभं। अंकस्थायाः सरसिजरुचेः स्वच्छजाल

विपाणैर्ध्यायेन्नो विनिहितकरं रत्नमौलिं भजा मः। पूजनं प्राकृवत्। लक्षमेकं पुरश्चरणं। अपूपैर्दशां

शहोमः। ६ अथ हेरंबगणपतिः। ॐ गूं नमः ४ वर्णाः गणक ऋषिः। गायत्री छंदः। पंचवक्त्रो हेरंबो देवता।

गं बीजं। हुंगों बिंदुनाशक्तिः। गां गीं इत्यादी षडंगः ध्यानं मुक्ताकांचननीलकुंदघुसृणः छायैस्त्रिनेत्रान्वितै

र्नागास्यैर्हरिवाहनं शशिधरं हेरंबमर्कप्रभं। सर्पदा नमभीति मोदकरदान्टंकं शिरोक्षात्मिकां मालां मु

द्गरमंकुशं त्रिशिखकं दोर्भिर्दधानं भजे। १। एकाक्षरगणपतिवदावरणार्च्चा। पीठमंत्रः। ॐ नमः हूं हूं मत्तासिंहासनाय नमः

इति विशेषः। लक्षपुरश्चरणं तिलैर्दशांशहोमः। ७ अथ हरिद्रागणेशः। ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्वजनहृदयं

स्तंभय स्तंभय स्वाहा। २२ वर्णाः मदन ऋषिः। अनुष्टुप् छंदः। हरिद्रागणेशो देवता। ग्लौं बीजं। स्वाहा शक्तिः। वेदाष्टकार समांगा २३

त्रे न्रा णे र रं ग कल्पना। वेदाश्चत्वारः। शरः पंच अंगानि षट् नेत्रे द्वे। मंत्राणि वेदादिसंख्येय षडंगः ध्यानं। पाशांकुशे
मोदकमेकदंतं करैर्दधानं करकासनस्थं॥ हारिखंड प्रति मंत्रितेनं मीतोन्नु कंठासि गणेनामीडे॥ बहुलक्षं पुरश्च
रणं हारिद्रादि चूर्णं। मिश्रितं तंदुलैर्दद्यान् होमः मंत्लार्लरं॥ ग्लौं एकाक्षरः पूर्वोक्तमन्त्र्यादि दीर्घयुक्तेन बीजेन षं
गः अन्य पूर्वोक्तमेव पूजनं एकाक्षरगणेशवत्॥ ८ अथ गणेशगायत्री ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीम
हि। तन्नो दंतिः प्रचोदयात्॥ ९ इति मंत्रचक्रिकायां गणेशमंत्रविधानानि स्य स्त्रीतीयोल्लासः॥ २ अथ लक्ष्मीमं
त्राः क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा १८ र्णः। नारायण ऋषिः। गायत्री छंदः। श्रीकृष्णो देवता। क्लीं बी
जं स्वाहा शक्तिः खलु खलु द्विसंख्येयवर्णमंत्रैः पंचांगानि। ध्यानं स्मरेद्वृंदावने रम्ये मोहयंतमनारतं। गोविंदं पुंडरीकाक्षं
गोपकन्याः सहस्रशः। आत्मनो वदनांभोजप्रेरिताक्षमधुव्रताः। पीडिताः कामबाणेन चिरमाश्लेषणोत्सुकाः॥ मुक्ता
हारलसत्पीनतुंगस्तनभरानताः। स्रस्तधम्मिल्लवदना मदस्खलितभाषणाः। दंतपंक्तिप्रभोद्भासि स्पंदमानाधराञ्चि
ताः। विलोभयंती विविधैर्विभ्रमैर्भावगर्भितैः। फुल्लेंदीवरकांतिमिंदुवदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तु
भधरं पीतांबरं सुंदरं। गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे

२८

इति ध्यात्वा। प्रागुक्तवैदमेव पीठे ॐ विमलायै उत्कर्षिण्यै· ज्ञानायै· क्रियायै· योगायै· प्रह्व्यै· सत्यायै· ईशान्यै· अ
नुग्रहायै· इति पीठशक्तिः संपूज्य। ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठा
त्मने नमः इति मंत्रेण पीठं संपूज्य। देवं आवाह्य षोडशोपचारैः समाराध्य। आवरणार्चनं कुर्यात्॥ षट्कोणेषु अं
गैः प्रथमावरणं। अथाष्टदलमूले। ॐ कालिंद्यै नमः· अग्नजित्यै· मित्रवृंदायै· चारुहासिन्यै· रोहिण्यै·
जांबवत्यै· रुक्मिण्यै· सत्यभामायै· इति द्वितीयावरणं। अष्टदलाग्रेषु ॐ ऐरावताय नमः· पुंडरीकाय· वामनाय·
कुमुदाय· अंजनाय· पुष्पदंताय· सार्वभौमाय· सुप्रतीय· इति तृतीयावरणं ततो इंद्रादिभिश्च तुर्यावरणं। वज्रादि
भिः पंचमावरणं। इत्यावरणार्चा। अथ पुरश्चरणं। अयुतद्वितयं जपः। अरुणकमलैः दशांशो होमः। अथ पूजायंत्र
षट्कोणं चाष्टपत्रं च भूगृहं चतुरस्रकमिति गौतमीये। बिल्वपत्रैस्तत्प्रसूनैर्नार्चयेद्देवाकृसुत। ऐं क्लीं कृष्णाय ह्रीं गो
विंदाय श्रीं गोपीजनवल्लभाय स्वाहा ह्स्रौः। नारद ऋषिः गायत्री छंदः श्रीकृष्णो देवता। ऐं क्लीं कृष्णाय हृत् ह्रीं गोविं
दाय शिरः श्रीं गोपीजन शिखा वल्लभाय कवचं स्वाहा सौ अस्त्रं। ध्या· वामोर्ध्वहस्ते सततं विधासर्वस्वपुस्तकं।
आक्षमाला दक्षोर्ध्वे स्फाटीकिं मातृकामयीं। शब्दब्रह्ममयं वेणुमधःपाणिद्वये रितं। गायंतं पीतवसनं श्यामलं

उपासितमुनिगणैरूपास्ति सुंदरिं सदा ॥ ध्यायेवं प्रमदावेषविल्लासं परमेश्वरं । इति ध्यात्वा पूजनं प्राग्वत् । चतुर्ल
क्षं जपेन्मंत्र मंत्री ससंयुतः ॥ त्रिमध्वक्तैः पलाशस्य पुष्पै होमाद्दशांशतः ॥ अथ शालग्राममंत्रः ॐ नमो भगवते
विष्णवे श्रीशालिग्रामनिवासिने सर्वाभिष्टफलप्रदाय सकलदुरितनिवारिणे शालग्रामाय स्वाहा इति मंत्रः ॥



अस्य साध्या नारायण ऋ· अनुष्टुप् छंदः लक्ष्मीनारायणो देवता । श्रीँ बी· ह्रीँ श· सौः कि·
मम सर्वाभिष्टसिध्यर्थे ज· मूलेन न्यासः ध्या· तुल्यप्रभं तपनकोटिभिरसचक्रकौमोदकी
दरवि[illegible]राजितपाणिपद्मं लक्ष्मीमतीसहितसा लसविचित्रभूषं नारायणं कपित्रावाससमाश्र
यामि इति ध्यात्वा । अनेनापि शालग्राममंत्रे णे सर्वनैस्मवजपपूजादिपूर्ध्वांजलिं दद्यात् । द
शांश[illegible] पश्च कर्तव्यः ॥ तन्मंत्रसान्निध्यार्थं इति शालग्राममंत्रः । अथ गोपालसुंदरी । ह्रीँ श्रीँ
क्लीँ कृष्णाय क४ गोविंदाय ह५ गोपीजनवल्लभाय स३ स्वाहा २३ वर्णः । विधाता नंदभैरवौ ऋषिः देवीगायत्री छंदः ॥
गो[illegible]लसुंदरी देवता । क्लीँ बी· स्वाहा श· ह्रीँ श्रीँ क्लीँ हृदे । कृष्णाय शिरः । गोविंदाय शिखा गोपीजन शिखा गोपीजनक·
वल्लभाय नेत्रं । स्वाहा स्त्रं · अथ वर्णन्यासः ह्रीँ नमः मूर्ध्नि श्रीँ ललाटे क्लीँ · भ्रुवो · कृँ · नेत्रयोः स्नौँ · कर्णयोः यँ नासा

पुटयोः ॐ · मुखे · विँ चुबुके · दँ कंठे यँ बाह्वोः गँ हृदि पीँ · उदरे · जँ नाभौ · नँ लिंगे वँ गुदे · ख्रुँ ऊर्वोः भाँ जान्वोः ...ँ
२५ घ...ः स्वाँ गुल्फयोः हाँ पादयोः इति सृष्टिन्यासः । हृदादिबाह्वंतः स्थितिन्यासः पादादिमूर्द्धांत संहारः । पुनस्
ष्टिस्थितिन्यासौ कुर्यात् । ततः ॐ आँ सौः अनेन मंत्रेण करशुद्धिं कृत्वा ह्रीँ श्रीँ क्लीँ सौः देव्यासनाय नमः पा
दये ... ह्रीँ श्रीँ हैँ हँ क्लीँ हसौः चक्रासनाय · जंघयोः ह्रीँ श्रीँ · हसैँ हँ स्क्लीँ हसौः सर्वमंत्रासनाय · जान्वोः ह्रीँ श्रीँ · ह्री
क्लीँ क्लूँ साध्यसिद्धासनाय · लिंगे · ततो वाग्देवतान्यासः ॐ १६ र्णं ब्लूँ वशिनी वाग्देवतायै नमः । शिरसि कँ ५ कल्ह्रीँ का
मेश्वरी वा · ललाटे चँ ५ र्क्लीँ मोदिनी वा · भ्रूमध्ये · टँ ५ यूल्रूँ विमला वा · कंठे तँ ५ ज्म्रीँ अरुणा वा · हृदी पँ ५ स्हल्वयूँ
जयिनी वा · नाभौ · यँ ४ क्ष्म्रयूँ सर्वेश्वरी वा · मूलाधारे । ॐ ५ क्ष्म्रीँ कौलिनी वा · सर्वांगे · ततः कँ ४ शिरसि हँ ५ मुखे
सँ २ हृदी क्षँ ४ हृत हँ ५ शिरः सँ २ शिखायां कँ ४ कवचे हँ ५ नेत्रे सँ २ अस्त्रे ध्यानं । अक्षमाला वसुधायुक्तं ध्याये श्रीचक्रगं हरिं
क्षीरांभोधिस्थ कल्पद्रुमवनविलसद्रत्नयुग्मं उपांतः प्रोद्यत्स्वर्णपीठसंस्थं करधृतजलजारीक्षुचापांकुशेषुपा
शां वीणां सवेणुं दधतमवनिमारमाभ्यां श्रितं रत्नकांतिं ध्याये द्वारपालमीशं विधिमुखविबुधैः सेव्यमानं समंतात् इति ध्यात्वा
प्रागुक्तवैष्णवपीठोपरि वक्ष्यमाणोक्तश्रीचक्रं संस्थाप्य ध्यात्वा वामतलेन गोपालरूपधरं हरिं आवाह्य संपूज्य । आग्नेयनि
पुरवायुकोणमध्ये दिक्षु च अंगैः प्रथमावरणं ततः प्रागादिदिक्षु ॐ वासुदेवाय · संकर्षणाय · प्रद्युम्नाय · अनिरुद्धाय ·

अथाग्नेयादिविदिक्षु। ॐ शांत्यै · श्रियै · सरस्वत्यै · रत्यै · इति द्वितीयावरणं। अष्टदिक्षु रुक्मिण्यै · सत्यभामायै ·
कालिंद्यै · जांबुवत्यै · मित्रविंदायै · सुनंदायै · सुलक्ष्मणायै · अग्निजित्यै · इति तृतीयावरणं। तदग्रेय · एव वा
य · इत्यग्रे इति चतुर्थावरणं ततो वक्ष्यमाणभेलोक्त श्रीचक्रार्चनं कुर्यात् तदशक्तेन सहस्राक्षरविधयापुष्पांजलिं दद्या
त्॥ अथ मंत्रमाहात्म्यं। एवं यो भजते नित्यं श्रीमद्गोपालसुंदरीं। सर्वान्कामानवाप्नोति सायुज्यं ब्रह्मणो व्रजेत्। अथ
पुरश्चरणं लक्षजपः। दशांशतर्पणहोमः। इति गोपालसुंदरीमंत्रविधानं गौतमीये। नारदः। सर्ववर्णाधिकारश्च
नारीणां योग्य एव च। तत्र हि भगवन्मंत्रमत्यायासफलप्रदं। गौतमः। वैष्णवेषु च सर्वेषु कृष्णमंत्राः फलाधिकाः
विशेषतो दशार्णोऽयं जपमात्रेण सिद्धिदः। मंत्रस्यज्ञानमात्रेण लभेन्मुक्तिं नु विधा॥ अनेन सदृशो मंत्रो ज
गत्यपि न विद्यते। अनेनाराधितः कृष्णः प्रसीदत्येव तत्क्षणात्। मंत्रोद्धारः। एवं ताक्षरं समुद्धृत्य त्रयोदश
स्वरान्वितं। पार्णं तूर्य स्वरयुतं छान्तं भांतं तथाद्वयं। अमृताक्षरमुद्धृत्य चैव कृत्वा मांसयुग्मकं। एतेयं मुखवृतेन पव
नस्यात्मयान्वितं। दशाक्षरमनुः प्रोक्तो दृष्टादृष्टफलप्रदः। तन्त्रे च। क्लींकारादसृजत् विश्वमिति प्राहुः श्रुतेर्गिरः
लकारात्पृथिवी जाता ककाराज्जलसंभवः। ईकाराद्वह्निरुत्पन्नो नादाद्वायुरजायत। बिंदोराकाशसंभूतिरिति
भूतात्मको मनुः। स्वाहेति। स्वाशब्देन च क्षेत्रज्ञः हेति चित्प्रकृतिः परा। गोपीजनवल्लभाय स्वाहा १ · र्ष्यः नारदऋषिः

चक्रा यक्ष वक्त्रं। असुरान्तक चक्राय अस्त्रं। इतिपंचांगं। मूलेन व्यापकं कृत्वा वर्णन्यासं कुर्यात्। ॐ क्लीं ॐ नमः
शिरसि। ॐ पीं ॐ ने। ॐ ॐ ॐ कर्ण। ॐ नं ॐ। नासिका। ॐ वं ॐ मुखे। ॐ लं ॐ हृदि ॐ भां ॐ उदरे। ॐ
पं ॐ लिंगदेशे। ॐ स्वां ॐ जानुनोः। ॐ हां ॐ नमः पादयोः। अथ ध्यानं। वृंदारण्यगकल्पपादपतले सद्रत्नपी
ठे नवे नेत्रा णाभे वस्त्रपत्रके स्थितमतं पीतांबरालंकृतं। नीमूतानभमनेकभूषणयुतं गोपोपगोपावृतं गोवि
दं स्मरे सुंदरं युतं वेणुरणं तं स्मरेत्। पूजनं प्रागुक्तावृष्ट्याक्षरवत्। लक्षपुरश्चरणं दशांशो कमलैर्होमः ४ मंत्रां
तरं। क्लीं हृषिकेशाय नमः ८ र्णः संमोहन नारद ऋषिः। गायत्री छंदः। त्रैलोक्यमोहनो देवता। दीर्घयुक्तकामबी
जेन षडंगः। षडंगं वैष्णवं यत्र तत्र नेत्रत्रयं भवेत्। इतिवचनात् वैष्णव षडंगे नेत्रहृदयं अन्यत्र तु नेत्रयमेव ध्या।
कल्पानोरुहतलसंस्थितस्य यो राजोन्नतां संस्थितं पीव्यं बाणमथेक्षुचाप कमले पांशांकुशौ बिभ्रतं। चक्रं शंख
गदे करैरुहध्रिजासंश्लिष्टदेहं हरिं नानाभूषणरत्नलेपरक्तकुसुमं पीतांबरं संस्मरेत्। इति ध्यात्वा आवरणार्चनं प्रा
ग्वत्। लक्षजपः द्वादशासतस्त्रं पाछाना कुसुमैर्होमः ५ गो त्रमीयः। एकादशस्य तु वरं विद्यात्रैलोक्यमोहनं। अनेन
सदृशो कृष्णो मंत्रः कृष्णमंत्रे न विद्यते। असौ समस्तमंत्राणां जीवनं कथितं मुने। नि बीजाय च मंत्रा वे रा
क्षि हीनाक्षरकुंठिताः अरिपक्षे। स्थितायेत्र केवलाः वर्णरूपिणः। एतदाप्येन जाप्येन जीवंत्येव पुनः तिच

मुनिः

६ श्रीँ ह्रीँ क्लीँ कृष्णाय गोविंदाय स्वाहा १२ र्णः ब्रह्मा ऋषिः गायत्री छंदः कृष्णो देवता क्लीँ बीजं स्वाहा शक्तिः श्रीँ हृदयं ह्रीँ शिरः
क्लीँ शिखा कृष्णाय कवचं गोविंदाय नेत्रं स्वाहा अस्त्रं ध्यानं चनादिकं अष्टाक्षरवत् भजपश्च अथ गायत्री त्रैलोक्यमोह
नाय विद्महे कामदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् कथिता विष्णुगायत्री समस्तजनरंजनी कामादिजपमा
त्रेण त्रैलोक्यवशकारिणी सर्वपापप्रशमनी सर्वपस्मेरीमोचनी मंत्रसिद्धिकरी पुंसां प्रायश्चित्तविशोधनी १७
ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा १६ र्णः नारद ऋषिः अनुष्टुप् छंदः रुक्मिणीवल्लभो देवता ॐ हृदयं नमः
शिरः भगवते शिखा रुक्मिणीवल्लभाय कवचं स्वाहा अस्त्रं इति पंचांगः ध्यानं चिंतारत्नयुक्त निजदोः परिरब्ध
कांत आलिंगितं सजललजेन करेण पत्न्या सौवर्णवेत्रयुतहस्तमनेकरत्न संपीतांबरं भजत कृष्णमभीष्टसिध्यै ध्या
कृमोले सो पूजनं प्राग्वत् लक्षं जपः दशांशं होमः ८ क्लीं गोवल्लभाय स्वाहा ८ र्णः ब्रह्मा ऋषिः गायत्री छंदः कृष्णो देवता क्लीं
गो हृदयं वल्ल शिरः भाय शिखा स्वाहा कवचं समस्तेनास्त्रं ध्यानं हरिं पंचवर्षं व्रजे धावमानं स्वसौंदर्यसंमोहितसर्व
गोपं यशोदासुतं स्त्रिगणैर्दृष्टके ओलिं भजे भूषितं भूषणैर्नूपुराद्यैः पूजनं प्राग्वत् लक्षं पुरश्चरणं अष्टसहस्रं
पलाश समिद्भिर्होमः ९ गोतमीये कृष्णेति द्व्यक्षरं मंत्रमध्यस्थ कामबीजयोः सद्यः फलप्रदं मंत्रं प्रजपेद्भक्तितत्परः
अस्याराधनतः शक्रो देवराजत्वमवासवान् क्लिं कृष्ण क्लिं चतुर्णः गौतमीये ब्रह्मा ऋषिः नारद ऋषिः गायत्री छंदः श्री

कलो देवता। दीर्घयुक्तकामबीजेन षडंगः। ध्यानं कल्पद्रुमलसंरूढ पपस्थं चिन्तयेद्धरिं कल्यद्रोरतीरमणीयपल्लवेभ्यः
२८ प्रोद्भ[illegible]र्मणिनिकरैः प्रसितक्रमीन्वां॥ ध्यायेयं कनकनिभां स्त्रकेवसानं भुंजानं दध्यन्नवानितपायसानि। अस्वछ
दो भुजे[illegible]व मावा सपिरिपूजयेत्। अर्चनं तु। अंग षट्कावृतैरेतं पूजयेद्दिग्धिष्ण्यरान्॥ तदस्त्रा। ण्णयपिचाते ब्रुस्तुः
सर्प[illegible]वांसमीरिता। गोतमिये। चतुर्लक्षं जपेन्मंत्रं व्रतस्थः साधकोत्तमः। दशांशं जुहुयाद्देनेश्रीफलैः सर्वसि
द्धये। नवनीतायुतं हुत्वा श्रियमाप्नो सानंदितां। श्रीफलायुतहोमेन राज्यादिर्मंत्रिणो भवेत्। अन्नवानन्न होमे
न धन[illegible]हो माप्यि[illegible]यं भवेत्। लक्षं जपः दशांशाश्रीफलै होमः॥ १६ अथ विद्यागोपालमंत्र। कृष्ण कृष्ण महाकृष्ण स
र्वज्ञत्वं प्रसीदमे। रमारमण विश्वेश विद्यामाशु प्रयच्छमे। ३२ र्णः। नारद ऋषिः। अनुष्टुप्छंदः। श्रीकृष्णो देवता।
व्यस्तै समस्तैश्चतुः पादैः पंचांगानि। ध्यानं दिव्योद्याने विवस्वत्प्रतिममणिमयमंडपे योगपीठमध्ये यः स
र्ववेदांतमय स्फुरत्तराः संनिषण्णा मुकुंदः। वेदैः कल्पद्रुरूपैः शिखरिशतसमालंबिकोशैश्चतुर्भिर्न्यायैस्त
र्कैः पुराणैः स्मृतिभिरवतस्तादृशैश्चामराद्यैः॥ दद्या। बिभ्रत्कराग्रेररिदरमुरली पुष्पबाणेक्षुचापा नक्षस्त्रकु
पूर्णकुंभौ स्मरललित वपुर्दिव्यभूषांगरागः॥ व्याख्यानान्वित त्वत्स्फुरदरुचिरपदो वेणुना विश्वमात्रेशी
द्धत्रो ऽष्टवेन श्रियमरुणा[illegible]चिर्वल्लवीवल्लभो नः॥ इति ध्यानं पूजनं प्राग्वत्। लक्षं जपः पलाशकुसुमैर्दशांशाहोमः
११ २८

बालगोपालमंत्राः कृः कृष्णः क्लिं कृष्ण ॥ क्लिं कृष्णाय कृष्णाय नमः ॥ क्लिं कृष्णाय नमः क्लीं कृष्णाय क्लीं गोपालाय स्वाहा ॥ क्लीं कृष्णा
य स्वाहा कृष्णाय गोविंदाय क्लीं कृष्णाय गोविंदाय क्लीं कृष्णाय गोविंदाय क्लीं कृष्णाय गोविंदाय क्लीं ॥ दधिभक्षणाय स्वाहा ॥ सुप्रसन्नात्म
ने गोविंदाय नमः क्लीं ग्लौं श्रीं श्यामलांगाय नमः ॥ बालवपुषे कृष्णाय स्वाहा ॥ श्रीं ह्रीं क्लीं कृष्णाय क्लीं बालवपुषे क्लीं कृष्णाय स्वाहा ॥
अथ ज्ञानिराजमंत्राः ॐ नमो भगवते नारायणाय स्वाहा ॥ ॐ ह्रीं क्लीं सर्वज्ञा सर्वज्ञा की श्रीं स्वाहा ॥ ॐ ह्रीं क्लीं सर्वज्ञा सर्वज्ञा की स्वा
हा ॥ क्लीं कृष्णाय बालवपुषे स्वाहा ॥ एषां विंशति मंत्राणां नारद ऋषिः गायत्री छंदः ॥ श्रीकृष्णो देवता ॥ दीर्घकामयुक्त बीजेन षडंगः
ध्यानं ॥ अव्याद्याकोनानीलांबुजरुचिररुणांभोजनेत्रोंबुजस्थो बालो जंघाकटीरस्थलकलितरणत्किंकिणीको मुकुंदः ॥ दोर्भ्यां हैयंग
वीनं दधदतिविमलं पायसं विश्ववंद्यो गोगोपीगोपवीतो रुरुनखविलसत्कंठभूषश्चिरं वः ॥ लक्षजपः ॥ तासितो पलपायसे
दंशांशं होमः ॥ पूजनं अष्टाक्षरमंत्रवत् ॥ १२ गोकुलनाथाय नमः ॥ ब्रह्मा ऋषिः गायत्री छंदः ॥ गोकुलनाथो देवता ॥ गोहृत्
कुल[illegible]ः ॥ नाथाय शिखा ॥ नमः कवचं ॥ समस्तेनास्त्रं ॥ ध्यानं ॥ वंदे नीलकलेवरं रुचिरया कांत्या महत्याश्रुतं बालं कुंतल
जाल[illegible]नयनं पंचाब्दिकं वांगणे ॥ धावंतं रत्नानासुनूपरमणिग्रैवेयहारांगदै राढीसंतरलं स्तुतं मुनिगणैर्हृष्यं यशोदासुतं ॥
अयं[illegible]स्तूनविता ॥ गो तमीये ॥ अथ संतारन सिद्धेन जपे न्यासमात्रे ॥ यस्य तौ विनेमात्रेण मंत्राः सिध्यंति मंत्रिणः ॥ अथ
तुल[illegible]मंत्रः ॥ क्लीं ह्रीं श्रीं पद्म श्रीं ॥ तुलसि श्री सखि शुभे पापहारिणि पुण्यदे ॥ नमस्ते नारदनुते नारायणमनःप्रिये ॥ अ
स्य शिव ऋषिः अनुष्टुप् छंदः ॥ तुलसी देवता ॥ क्लीं बीं ह्रीं रा श्रीं क्लि मंत्रेण द्विरावृत्त्या षडंगः ॥ ध्यानं ध्यायेत्तां तुलसिं

२८ देवीं श्यामांकुंचितमूर्धजां। बालदूर्वादलश्यामां पूर्णचंद्रनिभाननां। सुंदरीं चारुबिंबोष्ठीं नीलकुरुललोचनां॥ वरदाभ
यहस्तां पद्महस्तां तन्तुभस्तनीं॥ सर्वाभरणसंपन्नां सर्वसंतुष्टां सुमध्यमां। इति ध्यात्वा। अथ वर्णान्वा लक्ष्मीपी
ठे देवीं संपूज्य आवाहय्यांगै प्रथमावरणं। त्रिकोणेषु माहालक्ष्म्यै नमः। पार्वत्यै न॰ सरस्वत्यै॰ इति द्वितीयावृ॰
इंद्रादिभिस्तु तुर्थावरणं। इत्यावरणार्चा। पूजायंत्रं। अयुतं जपः पुरश्चरणं। दशांशं ज्य होमः। इमं मंत्रं जपन्वा
गुसिद्धमेघ्यसंशयं। धर्मार्थकाममोक्षांश्च लभते सेवनेन नरः। अथ पुत्रप्रदकृष्णमंत्राः। देवकीसुत गोविंद वासु
देव जगत्पते॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ऋषिः नारद ऋ॰ अनुष्टुप् छं॰ पुत्रप्रदः कृष्णो देवता। पादैः
समस्तेन च पंचांगानि। ध्यानं॥ विजयेन युतो रथस्थितः प्रसमानीय समुद्रमध्यतः। प्रददत्तनयान्द्विजन्मने स्म
रणीयो वसुदेवनंदनः॥ लक्षजपः। मधुरान्वितैर्लक्षदशांशहोमः। मंत्रांतरं ॐ श्रीं ह्रीं क्लीं ग्लौं देवकीसुतः॥ ऋषिः
श्रीकृष्णो देवता। ग्लौं बी॰ नमः श॰ पादेहृत् शिरः शिखा कवचानि कृत्वा॥ ॐ नमः इत्यस्त्रं। ध्यानं। वैकुंठादागतं
कृष्णं रथस्थं करुणानिधिं॥ किरीटिसारथिं पुत्रानानयंतं परात्परं। आदाय तान्रथस्थाय गुरवे वैदिकाय च॥ अर्प
यंतं महाभागं ध्यायेत्पुत्रार्थमच्युतं॥ अस्य सर्वं प्राग्वत्। ॐ क्लीं देवकीसु॰ तः ऋषिः दुर्वासा ऋ॰ अनुष्टु॰ श्रीकृष्णो
देवता दीर्घयुक्कामबीजेन षडंगः ध्या॰ बर्हापीडाभिरामं मृगमदतिलकं कुंडलाक्रांतगंडं रंविंकंसवंसत्रं कंजाक्ष
कंबुकंठं स्मितसुभगमुखं स्वाधरन्यस्तवेणुं॥ श्यामं स्वंगं रविंकैसत्रिभंगं रवसनं भूषितं वैजयंत्या वंदे वृंदावनस्थं यु

२८

वातेनातवरतं ब्रत्नगोपालवेषं ॥१॥ अयमेव मंत्रः प्रणवरहितः स्त्रियस्त्रिदर्णाः॥ गौतमीये। अनेन मंत्रितं साज्यं पुत्रद्धि
करं परं ॥ अनेन जलपानेन वंध्यावृषाद्युभेत्प्रजां ॥ अन्यत्सर्वं पूर्ववत् ॥ ॐ नमो भगवते जगत्प्रसूतये नमः ॥ १४र्णः
ब्रह्मा ऋ॰ गायत्री छं॰ कृष्णो दे॰ क्लीं बी॰ नमः श॰ क्लीं क्लीं इत्यादि षडंगः ध्यानं शंखचक्रगदापद्मं दधानं सूतिका
गृहे। अंके शयानं देवक्याः कृष्णं वंदे विमुक्तये। लक्षजपः। अन्यत्सर्वं प्राग्वत्। क्लीं देवकीसुत गोविंद॰ गतः
क्लीं ३४र्णः अन्यत्पूर्ववत् ॥ मंत्रांतरं ॐ क्लीं गौं वाउवासतस्वपगोपाकृत्यविहारदक्ष संतानं कुरु २ स्वाहा ॥ २९र्णः ॥ वृ
त्रिष्टुप् ऋ॰ देवीगायत्री छंदः संतानगोपालो देवता ॐ गौं बी॰ स्वाहा श॰ क्लीं कि॰ जपमुख्याः संतानार्थे जपे वि॰ गौं क्लीं
हृत इत्यादि षडंगः ध्या॰ अंगनामंगनामंतरे माधवं माधवं चांतरेणांगना ॥ इत्थमाकल्पिते मंडले मध्यगः
संजगौ वेणुना देवकीनंदनः ॥ अन्यत्पूर्ववत् ॥ अथ वेंकटेशमंत्रः ॐ श्रीं ह्रीं श्रीं भगवते वेंकटेशाय नमः
बृध ऋ॰ गायत्री छंदः वेंकटेशो दे॰ ॐ बी॰ ह्रीं श॰ वेंकटेशा की॰ ॐ हृदं। क्लीं शिरः। ह्रीं शिखा। श्रीं कवचं।
भगवते नेत्राभ्यां ॥ वेंकटेशाय॰ अस्त्रं। ध्यानं। श्रीभूयुतं मणिकिरीटिनं। मृदुवल्लभं सशंखचक्रकमलासिचतुर्भुजा
दयं। अर्धेंदुवालिपरिशोभितवरासनस्थं लां वेंकटेशमनिशं हृदि चिंतयामि॥ इति ध्यात्वा मंत्रांतरं। निर्मलं दामा
सानं जीवन्मुक्तोस्म्यहं देवो। चिंतये मुंजरीकाक्षं शंखचक्रवराभयं। करुणामृतसंपूर्णतरंगितकटाक्षकं। श्री

२९ रक्तपांडुवल्काभं पीतकौशेयवाससं। महोदारमुदारांगं श्रीनिवासं महामुनं इति ध्यात्वा वैष्णव पीठे अष्टद
ळपद्मं त्रातीः ॐ अक्षायै १ रत्यै २ सरस्वत्यै ३ प्रीत्यै ४ वृध्यै ५ तुष्ट्यै पुष्ट्यै आवे भ्राये मध्ये त्रयस्त्रिंशत्कोटि देव
ताभ्यो नमः प्रागुक्त वैष्णव पीठ मंत्रेण पीठं संपूज्य। तत्र देवं आवाह्य संपूज्य। अथावरण पूजा। सच्चिदा
नंदहु वत्ना करुन्णामृतसागरा। अनुज्ञां देहि लक्ष्मीवा परिवारार्चनाय मे। ॐ नमः ॐ श्रीं नमः ग्लौं नमः
मध्ये ॐ रां रामाय नमः इति प्रथमावरणं। त्रिकोणाद्बहिर्दिक्षु ॐ क्लीं नमः ॐ कुं न० ॐ स्मां न० ॐ यैं न०
इति द्वितीयावरणं २ पंचकण मध्ये ॐ नमः श्रीं नमः क्लीं न० ऐं नमः ह्रीं नमः इति। त्रितीयावरणं। पंचको
णाग्रेषु ॐ चक्राय० रां खड्गाय० गदायै० बाणाय० चापाय० इति चतुर्थावरणं षट्दलाग्रेषु षडंगेः पंच
मावरणं। षट्दलाग्रेषु ॐ सं नमः हुं नमः स्वा नमः रं नमः हुं नमः फट् नमः इति पंचमावरणं अथाष्ट
पत्रेषु ॐ नमः नं नमः मों नमः नौं नमः स्वं नमः यं नमः णां नमः यैं नमः वैं नमः कैं नमः टैं नमः शां नमः यैं न०
इति षष्ठावरणं। अष्टदलाग्रेषु ॐ नमः नैं न० मौं न० त्रां न० रां न० यैं न० णां न० यैं न० इति सप्तमावरणं। द्वादश
त्रेषु पूर्वादि ॐ नमः नं न० मौं न० भं न० गं न० वं न० तैं न० वां न० सुं न० दें न० वां न० यं न० इति अष्टमावरणं। द्वा
दशपत्राग्रेषु श्रीं नमः निं न० वां न० सां न० यं न० वैं न० कं न० टैं न० शां न० यं न० नं न० मः नमः इति नवमावरणं २९

षडश्रपत्रेषु ग्लौँ नः ॐ नः नँ नः मौँ नः भँ नः गँ नः वँ नः लँ नः भुँ नः वँ नः रौँ नः हौँ नः यँ नः ग्लौँ नः स्वाँ नः हौँ नः
इति दशमावरणं॥ ॐ उँ अँ बीँ रँ मँ लाँ विँ धुँ ज्वँ लँ तँ सँ वँ ताँ मुँ रचँ। न्रँ सीँ हँ भीँ षँ पँ लाँ द्रँ मँ
सुँ मँ सुँ नँ माँ म्यँ हँ इति एकादशावरणं॥
अथ भूगृहे आग्नेयादिविदिक्षु ॐ मँ मंदारायं रायनमः
यँ पारिजातोय सँ संतानाय कँ कल्पवृक्षाय हँ हरिचं
दनाय नः इति द्वादशावरणं॥ भूगृहदिक्षु हँ हनुमते नमः गँ
गरुडाय नँ नीलकंठाय विँ विष्वक्सेनाय आग्नेयादिक्षु
क्षँ क्षेत्रपालाय ग्लौँ नृसिंहाय दुँ दुर्गायै गँ गणपतये इति
त्रयोदशावरणं। अथाष्टदिक्षु अष्टवर्गान् चतुर्दशावरणं
तद्बहिः इंद्रादिभिः पंचदशावरणं वज्रादिभिः षोडशाव
रणं॥ तदुपरि दिक्षु मध्ये च नवनागान्॥ ॐ अनंताय वा
सुकिने शेषाय पद्माय तक्षकाय महापद्माय शंखपालाय कर्कोटकायन मध्ये कालियाय



॥

२

इति सप्तदशावरणं २ः इत्यावरणार्चनं कृत्वा । यंत्रं तु बिंदु त्रिकोण पंचकोष षड्दलाष्टपत्रद्वादशदल षोडश
दल द्वात्रिंशद्दल सकेसरं चतुरस्रं चतुर्द्वारं तच्चतुःकोणसुकंज अष्टगंधैर्लिं रवितलं सिद्धं वा पीठे संस्था
प्य पूजयेत् । विष्णोरष्टगंधं तु । तुलसीचंदनं कोष्ठ देवदारुस्तथागुरुः । कंदं बिल्वधात्रीच अष्ट
गंधैः प्रकीर्तिताः । पुरश्चरणं वर्णलक्षं जपः दशांशं साज्य पायसे होमः । भुक्तिमुक्तिप्रधानो
यं मंत्रः । इति मंत्रचंद्रिकायां कृष्णमंत्रविधाख्यश्चतुर्थोल्लासः ॥ ४ अथ राममंत्राः । रां रामाय
नमः ६ र्णः । ब्रह्मा ऋषिः गायत्री छंदः श्रीरामो देवता । रां बी० नमः श० दीर्घयुक्तबीजेन षडंगः । रां रीं इत्यादि
अथ वर्णन्यासः । ॐ रां नं० ब्रह्मरंध्रे ॐ रां नमः भ्रूमध्ये । ॐ मां हृदि । ॐ यं नाभौ । ॐ नं गुह्ये
ॐ मं नमः पादयोः । अथ ध्यानं कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञान
मयीं दधानमपरं हस्तांबुजं जानुनि । सीतां पार्श्वगतां सरोरुहकरां विद्युत्प्रभां राघवं पश्यतं मु
कुटांगदादिविविधाकल्पोज्ज्वलांगं भजे ॥ इति ध्यात्वा ततो दश मुद्राः प्रदर्शयेत् । शंख० चक्र०
गदा० पद्म० मुशल० धेनु० कौस्तुभाय० गरुडा० श्रीवत्सा० वनमा० योनि इति दशमुद्राः । ततो रामा ३०

य नमः इति पंचाक्षरः अस्यार्थस्तु रामभाय नमः इति पदत्रयं ॥ तत्र रामपदस्यार्थः । सच्चिदानंदलक्षणं
श्रुतिसिद्धं परं ब्रह्म समरमात्मेति कथ्यते ३॥ नमः पदस्य चार्थस्तु अहमित्यनुभूयते ॥ महावाक्यार्थकोमं
त्रो ब्रह्मैवास्मि तत्र स्फुटं ब्रह्मैव रामः सेवाहं वस्तुतो न्यतुमो पिकं ॥ इत्येवं भावयेत्प्राज्ञः समुक्तो ना
त्र संशयः । गुरुभक्ताय दातव्यमेतज्ज्ञानमुमुक्षुभिः ॥ ब्राह्मणायैव शांताय नान्यस्मै यस्य कस्य चित् ॥
प्रागुक्तपीठे देवं आवाह्य संपूज्य ॥ अथावरणपूजा ॥ षट्कोणेषु षडंगैः प्रथमावरणं ॥ देवस्य वामभागे
ॐ श्रीं सीतायै स्वाहा इति मंत्रेण सीतां संपूज्य ततो अष्टदले ॐ हनुमते नमः सुग्रीवाय नमः भरता
य · विभीषणाय · लक्ष्मणाय · अंगदाय · शत्रुघ्नाय · जांबवते · इति द्वितीयावरणं । अष्टदलाग्रेषु ॐ
दृष्टये · जयंताय · विजयाय · सुराष्ट्राय · राष्ट्रवर्धनाय नमः अकोपाय · धर्मपालाय · सुमंत्राय · इति तृती
यावरणं ततो बहिः लोकपालैश्चतुर्थावरणं । वज्रादिभिः पंचमं । इत्यावरणार्चा । पुरश्चरणं वर्णलिं ॥
संजपः ॥ दशांशो होमः । अथ पूजायंत्रं षट्कोणं पूर्वमालिख्य तदग्रे वृत्तमालिख्य तद्बहिः अष्टदलं पद्मं

अप्सु: पार्थीवमंडलं एवमंडलमालिख्य शोभनं व्यक्तमुज्वलं १ रां इत्येकाक्षर: अन्यत् सर्वं पूर्ववत्
मंत्रांतराणि। क्लीं रामाय नम: ह्रीं रामाय. ऐं रामायन. श्रीं रामाय. एते षट् पंचाणां क्रमेण संमोह
नशक्ति: दक्षिणामूर्ति: अगस्त्य: शिव: एते ऋषय:। कामादे: संमोहन: मायादे: शक्तिरित्यादि
अन्येष्वक्षरवत्॥ मंत्रांतरमाह। ॐ ह्रीं ह्रीं रां मां रामाय नम:। यद्वा ॐ ह्रीं नमो रामाय ह्रीं १ शिवो
मा राम मंत्रोऽयं वस्वर्णस्तु वसुप्रद: अस्य सदाशिव ऋषि: गायत्री छंद: शिवो मा राम चंद्रो देवता॥
रां बी. ह्रीं शा. ॐ की. ॐ सीं ह्रीं हलइत्यादि ध्यानं॥ रामं त्रिनेत्रं सोमार्द्धधारिणं
शूलिनं वरं॥ भस्मोद्धूलितसर्वांगं कपर्द्दिनमुपास्महे॥ रामाभिरामां सौंदर्य
श्रीमां सोमावतंसिनीं॥ पाशांकुशधनुर्बाणधरां सीतां त्रिलोचनां॥ ध्या
यन्नेवं वर्णलक्षं जपंस्त्रिमधुरापुतै:। बिल्वपत्रै: फलै: पुष्पैस्तिलैर्वा पंकजै
र्हुनेत्॥ स्वयमायांति निधय: सिद्धयश्च सुरार्पिता:। पूजनं प्राग्वत्॥ २

ॐ श्रीं भरताग्रजराम क्लीं स्वाहा १२ वर्णः अगस्त्य ऋ० ... गायत्री छंदः रामो देवता। रां बी० श्रीं श० ॐ

हृत्। श्रीं शिरः भरताग्रजराम शिखा। क्लीं कवचं। स्वाहा अस्त्रं ध्यानादि पूर्ववत्॥४॥ ॐ रामभद्र महे

ष्वास रघुवीर नृपोत्तम। दशास्यांतक मां रक्ष श्रियं मे देहि दापय २२ वर्णः॥ अगस्त्य ऋषिः अनुष्टुप् छं

दः रामो देवता। ॐ बीजं श्रीं श० व्यस्तसमस्त पादैः पंचांगः। अन्यत् पूर्ववत्॥५॥ ॐ नमो ब्रह्मण्यदेवा

य रामायाकुंठतेजसे। उत्तमश्लोकधुर्याय हस्तदंडा पितांघ्रये॥ २२ वर्णः शुक्र ऋ० अनुष्टुप् छं० रामो दे०

रां बी० आयेश० पादैः समस्तेन च पंचांगानि॥ ध्यानादि पूर्ववत्॥ लक्षं जपः॥ सायुज्यमाप्य सेनदर्गां त्वं

हो मः॥६॥ ॐ ह्रीं श्रीं दाशरथाय सीतावल्लभाय त्रैलोक्यनाथाय नमः २३ वर्णः अगस्त्य ऋ० बृहती

छं० रामो दे० ह्रीं बी० नमः श० ध्यानादि पूर्ववत्॥७॥ अथ मंत्रांतरं॥ श्रीराम जयराम जयजयराम १३ वर्णः

ब्रह्मा ऋ० विराट् छं० श्रीरामो दे० रां बी० स्वाहा श० श्रीराम हृत् जयराम शिरः जयजयराम शिखा

श्रीराम कवचं। जयराम नेत्राभ्यां वौषट्। जयजयराम अस्त्रं॥ ध्यानं॥ अयोध्यानगरे रत्नचित्रे

सौवर्णमंडपे॥ मंदारपुष्पैराबद्ध वितान तोरणांचिते॥ सिंहासने समारूढं पुष्पकोपरि राघवं॥

९६


३२

रक्षोभिर्हरिभिर्देवै दिव्ययानगतैः शुभैः संस्तूयमानं मुनिभिः प्रह्वैश्च परिसेवितं ॥ सीतालंकृत
वामांगं लक्ष्मणेनोपशोभितं ॥ श्यामं प्रसन्नवदनं सर्वाभरणभूषितं ॥ इति ध्यात्वा पूजनं प्राकुर्व
न् ॥ लक्षं जपः ॥ दशांशं साज्यपायसहोमः ॥ ८ हुं जानकीवल्लभाय स्वाहा ॥ १० र्णः वसिष्ठ ऋ॰ वि
राट् छंदः श्रीरामो दे॰ १ क्लीं बी॰ स्वाहा श॰ क्लां क्लीं इत्यादि षडंगः ॥ ध्यानं राजाज्ञायो ध्यानगर विलसन्म
ण्डपे रत्नभित्तौ तताद्दिक्षु दिस्थित समुमनस्तोरगे दिव्यगंधे ॥ नानादिग्भ्यो धनपतिधनो दिव्यसिं
हासनस्थो दिव्याकारैरनुजनिवहैः सेवितः स्वद्रुमूले ॥ दिव्यैर्माल्यैर्दिविचसततं स्तूयमानः सुराद्यैः
श्रेष्ठैः प्रीतैर्दृढमुनिवरैर्वामदेवादिभिश्च ॥ एकाचंद्राप मितसुमुखः श्यामलश्चारुलक्ष्या ध्येयः सद्यो विरचि
तमहाराज राज्याभिषेकः ॥ इति ध्यानं पूजनं प्रागुक्तप्रकारेण ॥ लक्षं जपः दशांशं होमः १ अथ
सीतारामसमंत्रः ॥ ॐ ह्रीं श्रीं श्रीं रां रामाय नमः ॥ श्रीं सीतायै स्वाहा रां श्रीं श्रीं क्लीं ॐ २१ र्णः सुयज्ञ
ऋ॰ जगती छंदः सीतारामो देवता ॥ श्रीं बीं॰ स्वाहा शा॰ रां॰ ॐ क्लीं हृदं ॥ श्रीं श्रीं शिरः रां रामाय

३२

नमः॥ शिखा॥ श्रीँ सीतायै स्वाहा कवचं॥ राँ श्रीँ श्रीँ नेत्रं॥ क्लीँ ॐ अस्त्रं॥ ध्यानं॥ तत्पाश्चपदभां विदेहतनयां रामांकपीठ
स्थितां तद्दृष्टेक्षणतत्परां मणिषांहस्तस्थितां ब्जासुलं॥ रामं दाशरथिं रमाकुचलसद्धस्तं तदास्येक्षणं कस्तूरीरचि
तस्वदक्षिणकरं ध्यायेदभीष्टाप्तये॥ इति ध्यात्वा पूजनं प्राग्वत्॥ लक्षं जपः॥ दशांशाक्रमतो होमः॥ १० इति
१४ राममंत्राः॥ अथ गायत्री॥ दाशरथाय विद्महे सीतावल्लभाय धीमहि॥ तन्नो रामः प्रचोदयात्॥
अथ लक्ष्मीनारायणमंत्रः॥ ॐ ऐँ श्रीँ ह्रीँ क्लीँ लक्ष्मीनारायणमंत्रम ॥१४ र्णः ब्रह्मा ऋ- गायत्री छंदः॥ लक्ष्मी
नारायणो देवता॥ दीर्घयुक्त श्रीबीजेन षडंगः॥ अथवा ॐ ह्रँ पुंडरीकाक्ष परमेशाराय नमः हृदा॥
ॐ क्लीँ सकलसौभाग्यनिधये नमः शिरः॥ ॐ नौँ वांछितसिद्धिप्रदाय नमः शिखा॥ ॐ राँ अखिलदु
खशमनाय नमः कवचं॥ ॐ यँ आनंतस्कंदराय नमः नेत्रं॥ ॐ णाँ लक्ष्मीनारायणा नमः अस्त्रं॥ ध्या॰
लक्ष्मीचारुकुचद्वंद्वकुंकुमांकितवक्षसे॥ नमो लक्ष्मिपते तुभ्यं सर्वाभीष्टप्रदायिने॥ इति ध्यात्वा
प्रागुक्तपीठे देवं आवाह्य संपूज्य आवरणान्याकुर्यात्॥ षट्कोणेषु षडंगैः प्रथमावरणं ततोऽष्टदलेदिक्ष

ॐ वासुदेवाय नमः। संकर्षणाय॰ प्रद्युम्नाय॰ अनिरुद्धाय॰ विदिक्षु श्रियै॰ सरस्वत्यै॰ रत्यै॰ शांत्यै॰ इ॰ द्वि॰ व॰
दलाग्रेषु चक्राय॰ शंखाय॰ गदायै॰ पद्माय नमः कौस्तुभाय॰ मुसलाय॰ खड्गाय॰ वनमालाय॥ इति



त्रितीयावरणं॥ तद्बहिः प्रागादिदिक्षु ॐ ध्वजाय॰ पद्मनिधये॰ गरुडाय॰
शंखनिधये॰ अथाग्नेयादिविदिक्षु ॐ विघ्नेशाय॰ आरत्यै॰ दुर्गायै॰ विष्व-
क्सेनाय॰ इ॰ चतु॰ लोकपालैः पंच॰ रस्या वरणार्चनं पुरश्चरणं तु॥ वर्णलक्ष
जपः किंशुककुसुमैर्दशांशो होमः अथ पूजायंत्रं बद्ध कोष्ठं वसुपत्रं च च
तद्धारोपत्रोभितांमिति अथ गायत्री ॐ नारायणाय विद्महे वासुदेवाय धीम
तन्नो विष्णुः प्रचोदयात्॥ र॰ लक्ष्मी॰ मंत्रैः॥ अथ वासुदेवद्वादशाक्षरमंत्रः॥ ॐ न
मो भगवते वासुदेवाय॥ १२ वर्णः प्रजापतिऋ षिः॥ गायत्रीछंदः॥ वासुदेवो देवता ॐ
बीजं॥ अयेति शक्तिः ॐ हृत् नमः शिरः॥ भगवते शिखा वासुदेवाय कवचं

ॐ नमो भगवते वासुदेवाय अस्त्रं॥ ॐ नमः मूर्द्धां १ नं भाले २ मों नेत्रयोः ३ भं आस्ये ४ गं गले ५ वं बाह्वोः ६ तें हृद ७ वां
कुक्षौ ८ सुं नाभौ ९ दें लिंगे १० वां जानुद्वये ११ यं नमः पादयोः॥१२॥ इत्यक्षरं न्यासः॥ अथ ध्यानं विष्णुं शारदेंदु चंद्रको
टि सदृशं शंखवर रथांगं गदामंभोजं दधतं सिताब्ज निलयं कांत्या जगन्मोहनं॥ आबद्धांगद हार कुंडल महा
मौलिं स्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं वंदे मुनींद्रैः स्तुतं॥ इति ध्यात्वा प्रागुक्त पीठे देवं आवाह्य
संपूज्य॥ षट्कोणेषु षडंगैः प्रथमावरणं॥१ ततो अष्टदले दिक्षु वासुदेवाय. संकर्षणाय. प्रद्युम्नाय. अनिरु
द्धाय. विदिक्षु शांति. श्री. सरस्वती. इ. द्वि. व. ततो द्वादशदले केशवादिद्वादशनामानि इ. त. व. इं
द्रादिभिः च. थर्ा व. वज्रादिभिः पंच व. इत्यावरणार्चनं॥ अथ पुरश्चरणं शारदायां वर्णलक्षं जपेन्मं
त्रं शीतो विजितेंद्रियः॥ तत्सहस्रं प्रजुहुयात् तिलै राज्यपरिप्लुतैः॥ वासुदेवध्याने. दक्षोपरि चक्रं. अधः
पद्मं. वामे॥ परि गदा अधः शंखः॥ यंत्रोद्धारे न प्रागुक्त षट्कोणाष्टदलोपरि द्वादशदलं कुर्यादिति विशेषः॥
अथ नृसिंहमंत्राः॥ क्ष्रौं एकाक्षरः॥ अत्रिऋषिः॥ गायत्री छंदः॥ श्रीनृसिंहो देवता॥ दीर्घयुक्तेन
बीजेन षडंगः॥ ध्यानं॥ तपनसोमहुताशनलोचनं घनविराममसिताऽसमप्रभं॥ अभयचक्र

३६ नाकवरान्करैर्दधतमिंदु धरं स्फुरि भजे ॥ इति ध्यात्वा ॥ अर्चनं तु वक्ष्यमाणोक्त श्रीमत्रराजवत् ॥ ए
जप ॥ हुतं तु पायसेन दत्तांशं होमः ॥ १ ॥ ह्रौं क्ष्रौं ह्रीं ॥ त्र्यक्षरः ॥ ऋष्यादि पूर्ववत् ॥ ह्रौं क्ष्रौं ह्रीं हृत ॥
ह्रौं क्ष्रौं ह्रीं शिरस्याद्यि ॥ अन्यत पूर्ववत् ॥ २ ॥ ॐ क्ष्रौं ॐ त्र्यक्षरः ॥ ॐ क्ष्रौं ॐ हृदये रस्यादि षडंगः ॥ अन्य
तसं पूर्ववत् ॥ ३ ॥ अथ मंत्रराजः ॥ उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं ॥ नृसिंहं भीषणं भद्रं मृ
त्युमृत्युं नमाम्यहं ॥ ३२ वर्णः ब्रह्मा ऋषिः अनुष्टुप् छंदः नृसिंहो देवता ॥ चतुश्चतुरष्ट षट् चतुस्त्र्ये
मंत्रवर्णैः षडंगः ॥ अथ वर्णन्यासः ॥ ॐ उं नमः शिरसि ॥ ग्रं॰ ललाटे ॥ वी॰ ॥ दक्षनेत्रे ॥ रं॰ वामनेत्रे ॥ मं॰ मुखे
हा॰ वि॰ ष्णुं॰ ज्वं॰ लं॰ दक्षबाहुसंधिषु साग्रेषु ॥ तं॰ स॰ र्वं॰ तो॰ मुं॰ वामबाहुसंधिषु साग्रेषु ॥ खं॰ उदरे
मः॰ हृदये सिं॰ कंठे ॥ नं॰ दक्षपार्श्वे ॥ मीं वामपार्श्वे ॥ ष्यं पृष्ठे ॥ हं नमः ककुदि ॥ ध्यानं ॥ माणिक्याद्रि
समप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणं ॥ बाहुभ्यां
धृतशंखचक्रमनिशं दंष्ट्राग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वंदे नृसिंहं प्रभुं ॥
इति ध्यात्वा मानसोपचारैः संपूज्य नागुरु वैष्णवपीठे दवे आवाह्य पुरः षट्सु नवोर्ध्वगो ३८

पचारैः संपूज्य आवरणार्चनं कुर्यात् ॥ तत्रादौ पूजायंत्रोद्धारः ॥ आदावष्टदलं पद्मं तत्कर्णिकायां न्यसेत् हैकाक्षरं अष्टदलेषु मंत्र
स्य चतुरश्चतुरो वर्णान्विलिखेत् ॥ ततो नृजपेत् रामादिना साधितं सर्वाक्षरेकरं मंत्रदेवताप्रकारे ॥ अथावर्णी ॥ अंगैः प्रथ
मावरणं ॥ प्रागादिदिक्षु ॥ पक्षीन्द्राय ॰ शार्वाय ॰ अनंताय ॰ कमलाय ॰ अग्नेयादिविदिक्षु ॥ श्रियै ॰ वह्रे ॰ तुष्ट्यै इति द्वितीयाव
रणं ॥ अथाष्टदलमूले ॐ स्तंभनकारिनृसिंहाय नमः ॥ वश्यनृसिंहाय ॰ मोहनकारिने ॰ मारणकारिने ॰ विद्वेषणकारि
ने ॰ उच्चाटनकारिने ॰ आकर्षणकारिने ॰ पुष्टिप्रदने ॰ निधिप्रदने ॰ ऊर्ध्वे ॐ विद्याप्रदने ॰ अधः तृतीयावरणं ॥ ततोऽष्ट
